ॐ श्रीगणेशाय नमः। कृष्णयजुर्वेदीयश्वेताश्वतरोपनिषद्भाष्यम्। इदं विवरणमल्पग्रन्थं ब्रह्मजिज्ञासूनां सुखावबोधायारभ्यते। तत्र [illegible] चित्तरहानेराद्वि
तीयब्रह्मतत्त्वरूपश्चेदात्मा नानेदाद्वितीयब्रह्मतत्त्वरूपो ध्यात्मा ह्यात्र यथा त्वविषयया विद्ययात्मानुभवगमयाद्य भावयात्माभाविकपुरुषपुमर्थः प्राप्तः
प्राप्तव्यानर्थः विद्यापरिकल्पितैरेव साधनैरिष्टप्राप्तिमनिष्टप्राप्तिं चापुरुषार्थमात्मार्थमलमममानोऽमकरादिभिर्विरागादिभिरितस्ततः समाकृष्यमा
णः स्वरनरतिर्यगादिप्रभेदभेदितेनेश्वरार्थकर्मानुष्ठानेनापगतरागादिमलो नित्यानित्यविवेकपूर्वेणेहामुत्रार्थभोगविरागेण वैराग्याचार्यद्वा
रेण वेदान्तश्रवणादिना ब्रह्मात्मेति ब्रह्मात्मतत्त्वमवगम्य निवृत्ताज्ञानतत्कार्यो वीतशोको भवति। तत्त्वज्ञानस्य मोक्षस्य विद्याधीनत्वात्तदुच्यते च
तदर्थोपनिषदारम्भः। तथा तद्विज्ञानादमृतत्वम्। तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय। न चेदिहावेदीन्महती विनष्टिः। य एतं
द्विदुरमृतास्ते भवन्ति। किमिच्छन्कस्य कामाय शरीरमनुसंज्वरेत्। तं विदित्वा न लिप्यते कर्मणा पापकेन। तरति शोकमात्मवित्। निचाय्य तं मृ
त्युमुखात्प्रमुच्यते। एतद्यो वेद निहितं गुहायां सोऽविद्याग्रन्थिं विकिरतीह सोम्य। भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः। क्षीयन्ते चास्य कर्माणि तस्मि
न्दृष्टे परावरे। यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय। तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम्। यो ह वै तच्छाय
मशरीरमलोहितं शुभ्रमक्षरं वेदयते पुरुषं वेद यथा मा वो मृत्युः परिव्यथाः। तत्र को मोहः कः शोक एकत्वमनुपश्यतः। विद्ययामृतमश्नुते। सर्वाणि
भूतानि विचित्य धीराः प्रेत्यास्माल्लोकादमृता भवन्ति। अपहत्य पाप्मानमनन्ते स्वर्गे लोके। तत्त्वं प्रसमीक्ष्य देही एकः कृतार्थो भवते वीतशोकः। य
एतद्विदुरमृतास्ते भवन्ति न हि शोकज्ञानाऽमृता भवन्ति न देवो पश्यति। निचाय्येमां शान्तिमत्यन्तमेति। तमेवं ज्ञात्वा मृत्युपाशांश्छिनत्ति। ये पूर्वं देवा
ऋषयश्च तद्विदुस्तेषाम्। बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते। कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः। जन्मबन्धविनिर्मुक्ताः पदं गच्छन्त्यना
मयम्। सर्वं ज्ञानप्लवेनैव वृजिनं संतरिष्यसि। ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा। एतद्बुद्ध्वा बुद्धिमान्स्यात्कृतकृत्यश्च भारत। ततो म.त.

स्मृ॰भा॰ त्वतो ज्ञानाद्विमुच्यते नरं नरकम्। सर्वेषामपि चैतेषामात्मज्ञानं परं स्मृतम्। तद्ध्यग्र्यं सर्वविद्यानां प्राप्यते ह्यमृतं ततः। प्राप्यैतत्कृतकृत्यो हि द्विजो भवति ना-
न्यथा॥ एवं यः सर्वभूतेषु पश्यत्यात्मानमात्मना। स सर्वसमतामेत्य ब्रह्माभ्येति सनातनम्। सम्यग्दर्शनसंपन्नः कर्मभिर्न निबध्यते दर्शनेन विहीनस्तु
संसारं प्रतिपद्यते। कर्मणा बध्यते जन्तुर्विद्यया च विमुच्यते तस्मात्कर्म न कुर्वन्ति यतयः पारदर्शिनः। ज्ञानेनैः श्रेयसंप्राप्नुवन्ति श्रेयदर्शिनः। त-
स्माज्ज्ञानेन शुद्धेन मुच्यते सर्वपातकैः। एवंभूते जायमाने विदित्वा ज्ञानेन विहीने जन्मस्यति नित्यं न विद्यते ह्यन्यथा तस्य पन्था तत्त्वमलोक वि-
वृत्तिप्रसक्तः। तेत्रत्रस्येश्वरज्ञानाद्धि शुद्धिः परमात्मता अयं तु परमो धर्मो यद्योगेन परमात्मदर्शनम्। आत्मज्ञः शोकसन्तीर्णो न बिभेति कुत-
श्चन मृत्योः सकाशान्मरणाद्वा कृताकृतात्॥ न जायते न म्रियते न बध्यो न च घातकः न बध्यो बन्धकारी वा न मुक्तो न च मोक्षदः॥ पुरुषः प-
रमात्मा तु यदतोऽन्यदसच्च तत्। एवं श्रुतिस्मृतीतिहासादिभ्यो ज्ञानस्यैव मोक्षसाधनत्वावगमाद्युज्यते एवोपनिषदारम्भः। किञ्च उपनिषत्समा-
ख्येयं ज्ञानस्यैव परमपुरुषार्थसाधनत्वमवगम्यते। तथा हि उपनिषदिति उपनिपूर्वस्य सदेर्विशरणगत्यवसादनार्थस्य रूपमाचक्षते। उपनि-
षच्छब्देन चात्र विद्योमितग्रन्थप्रतिपाद्यवस्तुविषया विद्योच्यते। तादर्थ्याद्ग्रन्थोऽप्युपनिषत्। ये मुमुक्षवो दृष्टानुश्रविकविषयवितृष्णाः सन्त उप-
निषच्छब्देन विद्यां तन्निष्ठतया निश्चयेन शीलयन्ति तेषामविद्यादेः संसारबीजस्य विशरणाद्धिंसनाद्विनाशनात् परं ब्रह्म गमयितृत्वात् गर्भजन्मजरामरण-
द्युपद्रवस्यावसादयितृत्वाद्वोपनिषत्समाख्यया व्यक्ततारं निःश्रेयस इति ब्रह्मविद्योपनिषदुच्यते। अवेदेतदुपनिषदारम्भो यदि विज्ञानस्यैव मो-
क्षसाधनत्वं भवेत् न चैतदस्ति कर्मणामपि मोक्षसाधनत्वावगमात्। अपाम सोमममृता अभूम। अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवती-
स्माद्दिना। न चैतदस्ति श्रुतिविरोधान्न्यायविरोधाच्च श्रुतिविरोधस्तावत् तद्यथेह कर्मजितो लोकः क्षीयते एवमेवामुत्र पुण्यजितो लोकः क्षी-
यते। तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय। न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः। ज्ञात्वा हीतं अद्वैता य-

ज्ञरूपाः। अष्टादशोक्तमवरं येषु कर्म। एतच्छ्रेयो येऽभिनन्दन्ति मूढा जरामृत्युं ते पुनरेवापि यन्ति। नास्त्यकृतः कृतेन। कर्मणा बध्यते जन्तुर्विद्य-
घ२ या विमुच्यते तस्मात्कर्म न कुर्वन्ति यतयः पारदर्शिनः। अज्ञानमलपूर्णत्वात् रागेण मलिनः स्मृतः तत्त्यागाद्भवेन्मुक्तिर्नान्यथा कर्मकोटिभिः।
प्रजया कर्मणा मुक्तिर्धनेन च सतां नहि त्यागेनैकेन मुक्तिः स्यात्तदभावे भ्रमन्त्यहो। कर्मोदयफलानुरागात्तथानुयान्ति न तरन्ति मृत्युम्। ज्ञा-
नेन विहीनास्ते जन्माभ्येति नित्यं न विद्यते ह्यन्यथा तत्र पन्थाः। एवं त्रयीधर्ममनुप्रपन्ना गतागतं कामकामा लभन्ते। आश्रमार्थमाश्रमाणामपि व-
र्णानां परमार्थतः आश्रमैर्न च वेदैश्च यज्ञैः सांख्यैर्व्रतैस्तथा उग्रैस्तपोभिर्विविधैर्दानैर्नानाविधैरपि न लभन्ते तमात्मानं लभन्ते ज्ञानिनः स्वयम्
। त्रयीधर्ममधर्मार्थं किंपाकफलसन्निभम्। नास्ति तात सुखं किंचिदत्र दुःखशताकुले। तस्मान्मोक्षाय यततां कथं सेव्या मया त्रयी। अ-
ज्ञानपाशबद्धत्वाद्मुक्तः पुरुषः स्मृतः॥ ज्ञानात्तस्य निवृत्तिः स्यात् प्रकाशात्तमसो यथा तस्माज्ज्ञानेन मुक्तिः स्यादज्ञानस्य परिक्षयात्।
व्रतानि दानानि तपांसि यज्ञाः सत्यञ्च तीर्थाश्रमकर्मयोगाः। स्वर्गादिमेवाशुभमध्रुवञ्च ज्ञानं ध्रुवं प्रीतिकरं महार्थम्। यज्ञैर्देवत्व-
माप्नोति तपोभिर्ब्रह्मणः पदं दानेन विविधान्भोगान् ज्ञानेन मोक्षमाप्नुयात्॥ धर्मरज्ज्वा व्रजेदूर्ध्वं पापरज्ज्वा व्रजेदधः द्वयं ज्ञानासि-
नाच्छित्वा विदेहः शान्तिमृच्छति॥ त्यज धर्ममधर्मं च उभे सत्यानृते त्यज उभे सत्यानृते त्यक्त्वा येन त्यजसि तत्त्यज। एवं श्रुतिस्मृतिविरो-
धान्न कर्मसाधनमसत्त्वं न्यायविरोधात्। कर्मसाधनत्वे मोक्षस्य चतुर्विधक्रियान्तर्भावाद् अनित्यत्वं स्यात् यत्कृतकं तदनित्यमिति क-
र्मसाध्यस्यानित्यत्वादर्शनात्। नित्यश्च मोक्षः सर्ववादिभिरभ्युपगम्यते तथा च श्रुतिः चातुर्मास्यप्रकरणे प्रजामनु प्रजायसे तदु ते मर्त्या-
मृतमिति किञ्च सुकृतमिति सुकृतस्यात्ययतनमुच्यते सुकृतशब्दश्च कर्मणि। नन्वेवं तर्हि कर्मणो द्वाराश्रित्वेहेतुत्वेन बन्धहेतुत्वमेव।

श्रे० भा०

सत्यं स्वतो बन्धहेतुत्वमेव। तथा च श्रुतिः। कर्मणा पितृलोकः। सर्वे एते पुण्यलोका भवन्ति। इष्टापूर्तं मन्यमाना वरिष्ठं नान्यच्छ्रेयो वेदयन्ते प्रमूढाः।
नाकस्य पृष्ठे ते सुकृतेऽनुभूत्वेमं लोकं हीनतरं वा विशन्ति। एवं कर्मसु निस्नेहा ये केचित्पारदर्शिनः। विद्यामयोऽयं पुरुषो न तु कर्ममयः स्मृतः। एवं
त्रयीधर्ममनुप्रपन्ना गतागतं कामकामा लभन्ते इति। यदा पुनः फलनिरपेक्षतयेश्वरार्थं कर्मानुतिष्ठति तदा मोक्षसाधनज्ञानसाधनान्तःकरण
शुद्धिद्वारा मोक्षसाधनं भवति। तथाह भगवान्। ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः। लिप्यते न स पापेन पद्मपत्रमिवाम्भसा। का
येन मनसा बुद्ध्या केवलैरिन्द्रियैरपि। योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वात्मशुद्धये। यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्। यत्तपस्यसि कौन्तेय
तत्कुरुष्व मदर्पणम्। शुभाशुभफलैरेवं मोक्ष्यसे कर्मबन्धनैः। संन्यासयोगयुक्तात्मा विमुक्तो मामुपैष्यसीति। तथा च मोक्षक्रमः। शुद्धभावे मो
हाभावे कर्माभिश्रुतच्चद्धि दर्शयति श्रीविष्णुधर्मे। अन्नपानकृतो यज्ञाः कर्मणा मे ततः परं ततो ज्ञानं लभत्येति योगी मुक्तिं क्रमाल्लभेत्। अने
कजन्मसंसारचिते पापसमुच्चये। नाक्षीणे जायते पुंसां गोविन्दाभिमुखी मतिः॥ जन्मान्तरसहस्रेषु तपोज्ञानसमाधिभिः। नराणां क्षीणपापानां कृ
ष्णे भक्तिः प्रजायते॥ न तत्कर्माप्य यो ह्यत्र महामुक्तिविरोधकृत्। तस्मैव ग्राम नेयत्नः कार्यः समारम्भीरुणा॥ स्ववर्णादिमहादानपुण्यतीर्थावगाह
नैः। शरीरैश्च महाक्लेशैः शास्त्रोक्तैस्तच्छमो भवेत्॥ देवताभ्यर्चितैः श्रद्धाश्रवणैः पुण्यदर्शनैः। त्रिकृष्णस्मरणाच्चैव पापबन्धः प्रशाम्यति। या
वल्लेशोऽपि शुद्धापेतात्तत्साधनशुद्धिं दर्शयति। कर्तव्याश्चाशयशुद्धिस्तु भिक्षुकेण विशेषतः। ज्ञानोत्पत्तिनिमित्तत्वात्स्वातन्त्र्यकरणाय च॥ मलिनो
हि यथाऽऽदर्शो रूपालोकस्य न क्षमः। तथाऽविपक्वकरणा आत्मज्ञानस्य न क्षमः॥ आचार्योपासनं वेदशास्त्रार्थेषु विवेकिता। तत्कर्मणामनुष्ठानं
सङ्गः सद्भिर्गिरः शुभाः॥ स्त्र्यालोकालम्भविगमः सर्वभूतात्मदर्शनम्। त्यागः परिग्रहाणां च जीर्णकाषायधारणम्॥ विषयेन्द्रियसंरोधतं

ज्ञा१

ल द्वारस्य विवर्जनम्। शरीरपतिमत्योनेमं स्वयं ग्रहणम्॥ नीरजस्तमसा सत्त्वशुद्धिर्निस्पृहता शमः। एतैरुपायैः संशुद्धः सत्त्वयोगममृतो भवेत्॥
यतो वेदाः पुराणानि विद्योपनिषदस्तथा। श्लोकाः सूत्राणि भाष्याणि यच्चान्यद्वाङ्मयं क्वचित्॥ वेदानुवचनं यज्ञो ब्रह्मचर्यं तपो दमः। श्रद्धोपवा
सः स्वातंत्र्यमात्मनो ज्ञानहेतवः॥ तथाथर्वणे विशुद्धरूपेण मानसेनानेन दर्शयति। जन्मान्तरसहस्रेषु यदा क्षीणं तु किल्बिषाः। तदा पश्यति यो
गेन संसारच्छेदनं महत्॥ यस्मिन् विशुद्धे विरक्ते च चित्ते ये आत्मवित् पश्यन्ति यतयः क्षीणदोषाः। तमेतं वेदानुवचनेन ब्राह्मणा विविदिष
न्ति यज्ञेन दानेन तपसानाशकेनेति बृहदारण्यके विविदिषाहेतुत्वं यज्ञादीनां दर्शयति। ननु विद्यां चाविद्यां च यस्तद्वेदोभयं सह। तपो वि
सके द्या च विप्रस्य नैःश्रेयसकरं परमित्यादिना कर्मणामप्यमृतत्वप्राप्तिहेतुत्वमवगम्यते। सत्यमवगम्यते एव तत्तु पापक्षयशुद्धिद्वारेण न च साक्षा
त्। तथा हि विद्यां चाविद्यां च। तपो विद्या च विप्रस्य नैःश्रेयसकरं परमित्यादिना ज्ञानकर्मणोर्निःश्रेयसहेतुत्वमभिधाय कथमनयोस्तद्धेतुत्व
मित्याकाङ्क्षायां तपसा कल्मषं हन्ति विद्ययामृतमश्नुते। अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुत इति वाक्यशेषेण कर्मणः कल्मषक्षयहेतु
त्वं विद्याया अमृतत्वप्राप्तिहेतुत्वं प्रदर्शितम्। यत्र श्रुत्याद्यवान्तरकार्यानुपदेशस्तत्रापि शाखान्तरोपसंहारन्यायेनोपसंहारः कर्तव्यः। ननु कुर्व
न्नेवेह कर्माणि जिजीविषेच्छतं समा इति यावज्जीवकर्मानुष्ठाननियमस्तत् कथं विद्यायाः मोक्षसाधनत्वमुच्यते कर्मण्यधिकृतस्यायं निय
मो नानधिकृतस्यानियोज्यस्य ब्रह्मविदः। तथा च विदुषः कर्मानधिकारं दर्शयति श्रुतिः नैतद्विद्वानेषणानुविधेयानरूप्येतेविधिनाप्रव
चारः। एतद्ध स्म वै तत्पूर्वे विद्वांसोऽग्निहोत्रं न जुहवाञ्चक्रिरे। एतं वै तमात्मानं विदित्वा ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणा
याश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति। एतद्ध स्म वै तद्विद्वांस आहुः ऋषयः कावषेयाः किमर्था वयमध्येष्यामहे किमर्था वयं यक्ष्यामहे सब्राह्मणः

श्री० केनसाध्येनस्यात्तेनेह प्राप्नोतीति यथाह भगवान्। यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः। आत्मन्येव चात्मनस्तुष्टस्तस्य कार्यं न विद्यते॥ नैव तस्य कृते
भा० नार्थो नाकृतेनेह कश्चन। न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः॥ तथा चाह भगवान्परमेश्वरः लैंगे कालकूटाख्याने। तेन नैतेन विप्रस्य मुक्त
३ संगस्य देहिनः। कर्तव्यं नास्ति विप्रेंद्रा अस्ति चेन्न तत्त्ववित्तु च॥ इह लोके परे चैव कर्तव्यं नास्ति तस्य वै। जीवन्मुक्तो यतस्तस्माद्ब्रह्मवित्परमार्थतः। ज्ञा
नाभ्यासरतो यस्तु सर्वतत्त्वार्थवित्स्वयम्। कर्तव्याभावमुत्सृज्य ज्ञानमेवाधिगच्छति॥ वर्णाश्रमौ नो यत्त्वा ज्ञाज्ञाने द्विजोत्तमः। अन्यत्र रमते सू लिमा
ढः सोऽज्ञानी नात्र संशयः॥ क्रोधो भयं तथा लोभो मोहो भेदस्तु यस्तमः। धर्माधर्मौ च तेषां हि तद्वानेस्तु गृहः॥ शरीरं सति वै क्लेशाः सोऽग
विद्यासंतत्यजेन्नरः। अविद्याविद्ययाहित्वा स्थितस्यैवेह योगिनः॥ क्रोधाद्या नाशमायांति धर्माधर्मौ च देहजौ। तत्त्वपानच्युता देहरोगाणां न पुनः सं
प्रयुज्यते॥ स एवमुक्तः संसाराद्दुःखत्रयविवर्जितः। तथाप्यनुधर्मान्स्वेराज्ञानाम्नैनतत्त्वस्य कृतकृत्यस्य योगिनः। नैवास्ति किंचित्कर्तव्य
स ६ मस्ति चेन्न स तत्त्ववित्॥ लोकद्वये न कर्तव्यं किंचिदस्य न विद्यते। इहैव स विमुक्तः स्यात्संपूर्णः समदर्शनः। तस्माद्विदुषः कर्तव्याभावाद्विद्या
वे ५ वद्विषय एवायं कुर्वन्नित्यादिकर्मनियमः। कुर्वन्नेवेह चेत्यादिश्च नायं कर्मेति यमः किंतु विद्याभावादात्मनः दर्शी पिठ यथाकाममकर्मानुष्ठानमेव वे।
द्रष्टव्यम्। एतदुक्तं भवति यावज्जीवं यथाकामं पुण्यपापादिकं कुर्वतोऽपि विदुषो न कर्मलेपो भवति विद्यासामर्थ्यादिति तथाहि ईशावास्य
मिदं सर्वमित्यारभ्य तेन त्यक्तेन भुंजीथा इति विदुषः सर्वकर्मत्यागेनात्मपालनमुक्त्वा नित्याज्ञे ब्रह्मविदिताग कर्तव्यतो क्तिर [redacted] पयुक्तेयो
क्तेति मतः शंकितः सन्नवेरा विदुषस्त्यागकर्तव्यतामपिनो क्तवान्। कुर्वन्नेवेह लोके विद्यमाने पुण्यपापादिकं कर्म यावज्जीवं जिजीविषेत्
न पुण्यपापादिकं च भयावस्पुण्यपापादिकं त्वत्कालेन लिप्यते इति। एतावता कर्माणि कुर्वन्नपि विदुषि न लिप्यते यावज्जीवानुष्ठानादन्यथाभावः स

रूपान्यश्रुतिः उपाधिनिमित्तसंसारान्वयो नास्ति । अथवा उत्तः कर्मानुष्ठानोत्तरकालभाव्यन्यथाभावः संसारान्वयो नास्ति यस्मात्त्वपि विन्य
स्ते न कर्म लिप्यते । तथा च श्रुत्यन्तरं न लिप्यते कर्मणा पापकेन । एवंविदि पापकर्म न श्लिष्यते । नैवं कृताकृते तपतः । एवं ह्यस्य सर्वे पाप्मानः प्र
दूयन्ते । ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा । लैंगे । ज्ञानिनः सर्वकर्माणि जीर्यन्ते नात्र संशयः । क्रीडन्नपि न लिप्येत पापैर्नानाविधैर
पि । शिवधर्मोत्तरेपि । तस्माज्ज्ञानासिना तूर्णमशेषं कर्मबन्धनम् । कामाकामकृतं छित्वा शुद्ध आत्मनि तिष्ठति । यथा वह्निर्महादीप्तः शुष्कमा
र्द्रं च निर्दहेत् । तथा शुभाशुभं कर्म ज्ञानाग्निर्दहते क्षणात् ॥ पद्मपत्रं यथा तोयैः स्वस्थैरपि न लिप्यते । शब्दादिविषयांभोभिस्तद्ज्ञानी न
गेउक्त लिप्यते । यस्मान्मन्त्रबलोपेतः क्रीडन्सर्पैर्न दृश्यते । क्रीडन्नपि न लिप्येत तद्वदिन्द्रियपन्नगैः ॥ मन्त्रौषधबलैर्यद्वज्जीर्यते भक्षितं विषम् । त
उक्तेः ६ द्वत्सर्वाणि पापानि जीर्यन्ते ज्ञानिनः क्षणात् । तथा च सूत्रकारः । पुरुषार्थोऽतः शब्दादिति बादरायणः इति । तान् स्वेव परमपुरुषार्थहे
तुत्वमभिधाय शेषत्वात्पुरुषार्थवादः इत्यादिना कर्मापेक्षितकर्तृप्रतिपादकत्वेन विद्यायाः कर्मशेषत्वमाशंक्याधिकोपदेशात्तु बादरायणा
स्येत्यादिना कर्तृत्वादिसंसारधर्मरहितापहतपाप्मादिरूपब्रह्मोपदेशात्तद्विज्ञानस्य र्विकानुकर्माधिकारसिद्धित्वाभासानस्य कर्माधिका
कृतस्य ४ रहेतोः क्रियाकारकफललक्षणस्य समस्तस्य प्रपंचस्याविद्यात्मनोऽमध्यात्स्वरूपापरज्ञाना कर्माधिकारः । इति प्रसंगात्किंचन्नकरणत्वाद्वि
नैकार्यत्वाच्च परस्परसमुच्चययोगाग्निभावो वा नास्तीति प्रतिपाद्यातएवाग्नीन्धनाद्यनपेक्षेति विद्याया एव परमपुरुषार्थहेतुत्वे ग्नीन्धनाद्याश्रमक ता २
र्माणि विद्यायां स्वार्थसिद्धौ नापेक्षितव्यानीति सूत्रेऽत्र साधिकरणस्य फलमुपसंहृत्यानन्तमेवानपेक्षायां प्रामाण्यं सर्वापेक्षा च यज्ञादिश्रुतेरश्ववद् च २
इति नात्यन्तमनपेक्षा । उत्पन्ना हि विद्या फलसिद्धिं प्रति न किंचिदन्यदपेक्षते उत्पत्तिं प्रति त्वपेक्षते एव विविदिषन्ति यज्ञेनेति श्रुतेरिति विविदि

श्रे० भा० ४ षासाधनत्वेन कर्मणामुपयोगं दर्शितवान्। तथा च न विद्योत्पत्तये ऽनुमतिर्वेति सूत्रद्वयेन कर्मान्तरे वेति पदद्वयस्य विषयत्वेन विद्यायास्तु तितेन वार्थ

द्वयं दर्शितवान्। अतउक्तेन प्रकारेण ज्ञानस्यैव मोक्षसाधनत्वाद्युक्तः परोपनिषदारम्भः। ननु बन्धस्य मिथ्यात्वे सति ज्ञाननिवर्त्यत्वेन ज्ञानादमृत

त्वं स्यान्नेतरथेति प्रतिपन्नत्वात्तथाभावात्तु। प्रमत्वादिस्वरूपत्वेनात्मनो विलक्षणत्वेन साङ्ख्यपातञ्जलादिप्रयासमस्मवाच्च। उच्यते न प्रतिपन्नत्वे

न सत्यत्वं वक्तुं शक्यते प्रतिपत्तेः सत्यत्वमिथ्यात्वयोः समानत्वात्। नापि तथाभावात्सत्यत्वम्। विश्वस्य ... ेन वस्तुत्वसम्भवात्। तथाहि श्रुतिः प्रपंच

स्य मिथ्यात्वं मायाकार्यत्वं एकत्वं च दर्शयति नेह नानास्ति किंचन। एकत्वमनाशि ह्यद्वैतं। कुतो नितिहिते वैषं नास्ति। एकमेवाद्वितीयम्। वाचारम्भ

णं विकारो नामधेयम्। एकमेवमद्वैतं नानास्ति किञ्चन। एकधैवानुद्रष्टव्यम्। मायां तु प्रकृतिं विद्यात्। मायां सृजते विश्वमेतत्। इन्द्रो मायाभिः

पुरुरूप ईयते इत्यादिभिर्वाक्यैः। अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन्। प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्ममायया। अविभक्तं च भूतेषु वि

२ भक्तमिव च स्थितम्। तथा च आत्मपुराणे यस्माद्धर्मोऽज्ञ मम तत् सा वेदु:खेषु कल्पना वर्णाश्रमास्तथा वासः स्वर्गनरका एव च। पुरुषस्य नस

त्यपि ते परमार्थसत्कु ... चित्। इष्यते च जगद्रूपमसत्यं सत्यवत्क्षणात्। तोयवत्क्षणतत्वात्तु यथा न कमरीचिका। सोऽपि वक्तीकसम्भूतं तकीकसंस्थु

क्तिरेव च। सर्पवद्रज्जुखण्डस्य निशायां वेश्ममध्यगः। एक एवेन्दुर्द्वौ किं ति तिमिराहतचक्षुषः। आकाशस्य घटीभावो नीलत्वं लिप्यता तथा।

एकस्य स्वर्पो बहुधा [redacted] जलाधारेषु दृश्यते। आभाति परमात्मापि सर्वोपाधिसंस्थितः। द्वैतभ्रान्तिरविद्यायां विकल्पानचेतनस्तथा। परत्रव

स्थायास्थायां तेषामात्माभिमानिनाम्। आत्मभावनया भ्रांत्या दैहं भावयतः सदा। आब्रह्मैतदिसर्पांते ऽर्भमसूते त्रिभिः सदा जाग्रत्स्वप्नसुषु

प्तैस्तुच्छादिते विश्वतैजसम्। सर्वाययास्वमात्मानमाविर्भावयेद्वैतत्तथा। गुहागतं स्वमात्मानं नलमते च स्वयं हरिः। योऽग्निवज्ज्ञानलज्ज्वालाकला ४

यो विविधाकृतिः ॥ आभाति विश्वेशः सृष्टिस्थलभावो हि तद्विलयः ।२० कालो मनसि ध्यानात्मा घोरे मृडे च ताहृशः ॥ ईश्वरो हि प्रपते नित्यं सर्वत्र न तु त
त्वतः ॥२१ देहमलिप्तो हि स्नायुगात्रभाजनमेदतः ॥ चराचराणां भूतानां हि ततानं च महत्मतः ।२२ सर्वं हि गतं निराधारे हि तत्स्यात्मनि संस्थिता ॥ अविद्या^
हि गुणं सृष्टिं करोत्यसर्पं यं स्मृतम् ।२३ सर्पत्वं रज्जुता नास्ति नास्ति रज्जौ भुजङ्गता ॥ उत्पत्तिनाशयोर्नास्ति कारणं जगतोऽपि च । लोकानां व्यवहारा
र्थमविद्येयं विनिर्मिता ॥ एषा विमोहिनी सृष्टा हेता हि तत्त्वरूपिणी ।२४ अद्वैतं भावयेद्ब्रह्म सकलं निष्कलं सदा ॥ आत्मज्ञः शोकमत्येति न^
विभेति कुतश्चन ।२६ मृत्योः सकाशान्मरणादथवान्यकृताद्भयात् ॥ न जायते न म्रियते न बध्यो न च घातकः ।२७ न बद्धो बन्धकारी वा न मुक्तो न च मो
क्षदः ॥ पुरुषः परमात्मा तु यदतोऽन्यदसच्च तत् ।२८ एवं बुद्ध्वा जगद्रूपं विश्वं मायामयं मृषा ॥ भोगसंयोगमुक्तो वै मुक्तः स्यात्सर्वविकल्पनाम् । तत्
त्सर्वविकल्पश्चात्मस्थं निश्चलं मनः ॥ कृत्वा ध्यानेन भवेद्योगी हृष्येन्न उद्वेजता ।२० एषा चतुर्विंशतिभेदभिन्ना परा माया प्रकृतिस्तस्मा
न्मुक्तौ । कामक्रोधौ लोभमोहौ भयं च विषादशोकौ च विकल्पजातम् ॥२१ धर्माधर्मौ सुखदुःखे च सृष्टिविनाशपाकौ नरके गतिश्च । वासः स्वर्गे^
जातिर्यश्चाश्रमाश्च रागद्वेषौ विविधा व्याधयश्च ॥२२ कौमारता यौवनजरा वियोगसंयोगभोगानशनव्रतानि । इतीदमीदृग्विभवं निधाय तू
ष्णीमासीनः सुमतिश्च विद्वान् ।२३ तथा च श्रीविष्णुधर्मे षडध्यायाम् । अनादिसंबन्धवति क्षेत्रज्ञोऽयमविद्यया । युक्तः पश्यति भेदेन ब्रह्म तत्त्वा
त्मनि संस्थितम् ॥ पश्यत्यात्मानमन्यं च यावद्वै परमात्मनः । तावत्संभ्राम्यते जन्तुर्मोहितो निजकर्मणा ॥ संक्षीणाशेषकर्मा तु परं ब्रह्म प्रपश्य
ति । अभेदेनात्मनः शुद्धं शुद्धत्वादक्षयो भवेत् ॥ अविद्या च क्रियाः सर्वा विद्या ज्ञानं प्रचक्षते । कर्मणा बध्यते जन्तुर्विद्यया च विमुच्यते । अद्वै
तं परमार्थो हि द्वैतं तद्भिन्न उच्यते । पशुतिर्यङ्मनुष्याख्यस्तथैवत् पनारकः ॥ चतुर्विधोऽपि भेदोऽयं मिथ्याज्ञाननिबन्धनः । अहमन्योऽपर

श्चायममीचात्रतथापरे॥ अज्ञानमेतद्द्वैताख्यमद्वैतं श्रूयतां परम्। ममत्वाहमिति प्रज्ञावियुक्तमपि कल्पवत्॥ अविकार्यमनाख्येयमद्वैतमनुभू-
यते। मनोमयं द्वैतमद्वैतं परमार्थतः॥ मनसो वृत्तयस्तस्माद्धर्माधर्मनिमित्तजाः। निरोद्धव्यास्तन्निरोधे अद्वैतं चोपपद्यते॥ मनोदृश्यमिदं स-
र्वं यत् किञ्चित्सचराचरम्। मनसो ह्यमनीभावे द्वैतभावं तदाप्नुयात्॥ कर्मणो भावना चेयं सा ब्रह्मपरिपन्थिनी। कर्मभावनया तुल्यं विज्ञानमुप-
जायते॥ तादृग्भवति विज्ञानं यादृशी त्वस्य भावना। क्षये तस्याः परं ब्रह्म स्वयमेव प्रकाशते॥ परमात्मात्मनोर्योऽयं विभागो ज्ञानकल्पितः। क्षये त-
स्यात्मपरयोर्विभागत एव हि। आत्मा क्षेत्रज्ञसंज्ञो हि संयुक्तः प्राकृतैर्गुणैः। तैरेव विगतः शुद्धः परमात्मा निगद्यते। तथा च श्रीविष्णुपुराणे
परमात्मत्वमेवैको नान्योऽस्ति जगतः परः। तवैव महिमा येन व्याप्तमेतच्चराचरम्॥ यदेतद्दृश्यते मूर्तमेतज्ज्ञानात्मनस्तव। भ्रान्तिज्ञानेन
पश्यन्ति जगद्रूपमयोगिनः॥ ज्ञानस्वरूपमखिलं जगदेतदबुद्धयः। अर्थस्वरूपं पश्यन्तो भ्राम्यन्ते मोहसंप्लवे॥ ये तु ज्ञानविदः शुद्धचेत-
सस्तेऽखिलं जगत्। ज्ञानात्मकं प्रपश्यन्ति त्वद्रूपं परमेश्वरम्॥ अहं हरिः सर्वमिदं जनार्दनो नान्यत्ततः [redacted] कारणकार्यजातम्। ईदृङ्मनो यस्य
न तस्य भूयो भवोद्भवा द्वन्द्वगता भवन्ति॥ ज्ञानस्वरूपमत्यन्तनिर्मलं परमार्थतः। तमेवार्थस्वरूपेण भ्रान्तिदर्शनतः स्थितम्॥ ज्ञानस्वरूपो भ-
गवान् यतोऽसावशेषमूर्तिर्न तु वस्तुभूतः। ततो हि शैलाब्धिधरादिभेदाञ्जानीहि विज्ञानविजृम्भितानि॥ वस्त्वस्ति किं कुत्रचिदादिमध्यप-
र्यन्तहीनं सततैकरूपम्। यच्चान्यथात्वं द्विज याति भूयो न तत्तथा तत्र कुतो हि तत्त्वम्॥ मही घटत्वं घटतः कपालिका कपालिकाचूर्णरज-
स्ततोऽणुः। जनैः स्वकर्मस्तिमितात्मनिश्चयैरालक्ष्यते ब्रूहि किमत्र वस्तु॥ तस्मिन्न विज्ञानमृतेऽस्ति किञ्चित्क्वचित्कदाचिद्द्विज
वस्तुजातम्। विज्ञानमेकं निजकर्मभेदविभिन्नचित्तैर्बहुधाभ्युपेतम्॥ ज्ञानं विशुद्धं विमलं विशोकमशेषलोभादिनिरस्तसङ्गम्॥

एकंसदैकंपरमःपरेशःसवासुदेवोनयतोन्यदस्ति॥सद्भावएवंभवतोमयोक्तोज्ञानंयथासत्यमसत्यमन्यत्।एतत्तुयत्संव्यवहारभूतंतत्रापिचोक्तं
वि॰२ भुवनाश्रितंते॥अविद्यासंचितकर्मतच्चाशेषेषुजंतुषु।आत्माशुद्धोक्षरःशान्तोनिर्गुणःप्रकृतेःपरः॥प्रवृद्ध्यपचयौनास्यएकस्याखिलजन्तुषु।यत्तु
कालांतरेणापिनान्यसंज्ञामुपैतिवै॥परिणामादिसंभूतंतद्वस्तुनृपतच्चकिम्।यद्यन्योस्तिपरःकोपिमत्तःपार्थिवसत्तम॥तदेषोहमयंचान्योवक्तुमे र्थि
वमपीष्यते।यदासमस्तदेहेषुपुमानेकोव्यवस्थितः॥तदाहिकोभवान्सोहमित्येतद्विफलंवचः।त्वंराजाशिविकाचेयंवयंवाहाःपुरःसराः॥
तै॰या अयञ्चभवतोलोकोनसदेतन्नृपोच्यते।वत्सराजेतियल्लोकेयच्चराजभटात्मकम्।तथान्यच्चनृपत्वञ्चतन्नसत्कल्पनामयम्।अनाशीप
रमार्थश्चप्राज्ञैरभ्युपगम्यते॥परमार्थस्तुभूपालसंक्षेपाच्छ्रूयतांमम।एकोव्यापीसमःशुद्धोनिर्गुणःप्रकृतेःपरः॥जन्मवृद्ध्यादिरहितआ
त्मासर्वगतोऽव्ययः।परज्ञानमयःसद्भिर्नामजात्यादिभिःप्रभुः॥नयोगवान्नयुक्तोऽभून्नैवपार्थिवयोक्ष्यति।तस्यात्मपरदेहेषुसतोप्येकमयंहि
प्य तत्॥विज्ञानंपरमार्थोसौद्वैतिनोतद्दर्शिनः।एवमेकमिदंविद्धिनभेदिसकलंजगत्॥वासुदेवाभिधेयस्यस्वरूपंपरमात्मनः।तदाब्रह्मततोमु
क्तिमवापपरमांद्विज॥सितनीलादिभेदेनयथैकंदृश्यतेनभः।भ्रान्तदृष्टिभिरात्मापितथैकःसन्पृथक्पृथक्॥एकःसमस्तंयदिहास्तिकिंचि
त्तदच्युतोनास्तिपरंततोन्यत्।सोहंसचत्वंसचसर्वमेतदात्मस्वरूपंत्यजभेदमोहम्॥इतीरितस्तेनसराजवर्यस्तत्याजभेदंपरमार्थदृष्टिः।स
चापिजातिस्मरणाप्तबोधस्तत्रैवजन्मन्यपवर्गमाप॥ तथालैङ्गे।तस्मादज्ञानमूलोहिसंसारःसर्वदेहिनाम्।परतत्त्वेस्वतत्त्वेचभिदाभावा
द्विचारतः।एकत्वमपिनास्त्येवद्वैतंतत्रकुतोस्त्विहो॥एकंनास्त्यथमर्त्यस्यकुतोमृतसमुद्भवः।नान्तःप्रज्ञोनबहिःप्रज्ञोनचोभयतएवच॥
नप्रज्ञानघनस्त्वेवंनप्रज्ञोऽप्रज्ञएवसः।विदितेनास्तिवेद्यञ्चनिर्वाणंपरमार्थतः॥अज्ञानतिमिरात्सर्वंनात्रकार्याविचारणा।ज्ञानञ्चबन्ध

श्वे० नह्येव मोहो नान्यात्मजो द्विजाः। न ह्येषा प्रकृतिर्जीवो विकृतिश्च विकारतः। विकारो नैव मायैषा सदसद्व्यक्तिविवर्जिता। तथा च भगवान्पर
मो० शरः॥ अस्माद्विजायते विश्वमत्रैव प्रविलीयते। स मायी मायया बद्धः करोति विविधास्तनूः॥ न चात्मा चैवं संसरति न च संसारयेत्परम्। न कर्त्ता
६
७२ नैव भोक्ता च न च प्रकृतिपुरुषौ। न माया नैव च प्राणश्चैतन्यं परमार्थतः। तस्मादज्ञानमूलो हि संसारः सर्वदेहिनाम्॥ नित्यः सर्वगतो ह्यात्मा कूट
स्थो दोषवर्जितः। एकः स भिद्यते भ्रान्त्या मायया न स्वभावतः। तस्माद्द्वैतमेवाहुर्मुनयः परमार्थतः। ज्ञानस्वरूपमेवाहुर्जगदेतद्विचक्षणाः॥
नारीतवाप्र अर्थस्वरूपमज्ञानात् पश्यन्त्यन्ये कुदृष्टयः। कूटस्थो निर्गुणो व्यापी चैतन्यात्मा स्वभावतः॥ दृश्यते ह्यर्थरूपेण पुरुषैर्भ्रान्तदृष्टिभिः। यदा पश्यप
ति चात्मानं केवलं परमार्थतः॥ मायामात्रमिदं द्वैतं तत्तदा भवति निर्वृतः। तस्माद्विज्ञानमेवास्ति न प्रपञ्चो न संसृतिः॥ एवं च त्वादिनामाभिहि
कारणोपन्यासमुखेन स्वरूपेणाभ्युपगतत्वात् प्रपञ्चस्य मिथ्यात्वमवगम्यते। अस्थूलादिलक्षणस्य ब्रह्मणस्तद्विपरीतस्थूलाकारो मि
थ्या भवितुमर्हतीति। यथैकस्य चन्द्रमसस्तद्विपरीतद्वितीयाकारस्तद्वत्। तथा च सूत्रकारः। न स्थानतोऽपि परस्योभयलिङ्गमस्तीति स्वरूप उ त
पाधितश्चाविकृतरूपद्वयमस्मिन्नास्ति निर्विशेषमेव ब्रह्मत्युपपद्यते। ननु भेदादिति श्रुतिबलाल्लिङ्गमिति सविशेषमपि ब्रह्मणाभ्युपगम्यते इत्या
शंक्य न प्रत्येकमतद्वचनादित्युपाधिभेदमतद्वचनभेदस्य श्रुत्यैव बाधितत्वाद्द्वैतश्रुतिबलात्सविशेषस्य ग्रहणायोगान्निर्विशेषमेवेत्युपपाद्या
पि चैनमेक इति भेदनिन्दापूर्वकमभेदमेवैतदेवाप्तास्त्विनः समामनन्ति। मनसैवेदमाप्तव्यम्। नेह नानास्ति किञ्चन। मृत्योः स मृत्युमाप्नोति य
इह नानेव पश्यति। एकधैवानुद्रष्टव्यमिति। भोक्ता भोग्यं प्रेरितारं च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्ममेतदिति सर्वभोक्तृभोग्यनियन्तृलक्षणस्य प्रपञ्चस्य
ब्रह्मैकस्वभावताऽभिधीयते इति पुनरपि निर्विशेषपक्षे दोक्षते किमित्येकस्वरूपस्योभयस्वरूपाभ्युपगमेनाकारभेदं ब्रह्मावधार्यते न पुनर्निर्वि

तदेतद्ब्रह्मापूर्वमनपरमनंतरमबाह्यमयमात्मा ब्रह्म । २

रीतमित्याशंक्याह रूपवदेव हि तत्प्रधानत्वादिति रूपाद्याकाररहितमेव ब्रह्मावधारयितव्यं कस्मात् तत्प्रधानत्वात् अस्थूलमनण्वह्रस्वमदी-
र्घमशब्दमस्पर्शमरूपमव्ययम् । आकाशो वै नाम नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्म सर्वानुभूरित्येतदनुशासनमिति एवमादीनि निष्प्रपञ्च-
ब्रह्मात्मतत्त्वप्रधानानि इतराणि आकारवद्ब्रह्मविषयाणि न तत्प्रधानानि । तत्प्रधानान्यतत्प्रधानेभ्यो बलीयांसि भवन्ति । अतस्तत्परश्रुति-
प्रतिपन्नत्वान्निर्विशेषमेव ब्रह्मावगन्तव्यं न पुनः सविशेषमिति निर्विशेषपक्षमुपपाद्य का तर्ह्याकारविषयाणां श्रुतीनां गतिरित्याकांक्षा-
यां प्रकाशवच्चावैयर्थ्यादिति चन्द्रजलादीनां जलाद्युपाधिवशादुपाधिकृतनानात्ववच्च ब्रह्मणोऽप्युपाधिकृतनानात्वरूपस्य विद्यमानत्वात्त-
दाकारवतो ब्रह्मण आकारविशेषोपदेशा उपासनार्था न विरुध्यन्ते । एवमवैयर्थ्यं नानाकारब्रह्मविषयाणां वाक्यानामिति श्रुतीनामौपाधिक-
ब्रह्मविषयत्वेनावैयर्थ्यमुक्त्वा पुनरपि निर्विशेषमेव ब्रह्मेति दृढत्वमाह च तन्मात्रमिति । स यथा सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नो रसघन एव । एवं वा
अरेऽयमात्माऽनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एवेति श्रुत्युपन्यासेन विज्ञानधात्वतिरिक्तरूपान्तराभावमुपन्यस्य चाथोपि स्मर्यत इति । अ-
थात आदेशो नेति नेति । अन्यदेव तद्विदितादथो अविदितादधि । यतो वाचो निवर्तन्ते अप्राप्य मनसा सह । अस्थूलमिति भेदं यत् सत्तामात्रमगो-
चरम् । वचसामात्मसंवेद्यं तज्ज्ञानं ब्रह्मसंज्ञितम् । विश्वस्वरूपवैरूप्यलक्षणः परमात्मनः । इत्यादिश्रुतिस्मृत्युपन्यासमुखेन अस्थूलमित्येवमे-
व ब्रह्मेत्युपपाद्य । एवं चोपमासूर्यकादिवदिति यत एव चेतनमात्ररूपो नेति नेत्यात्मको विदिताविदिताभ्यामन्यो वाचामगोचरोऽस्थूलमि-
चा त्यभेदो विश्वस्वरूपलक्षणः स्वपरमात्मनः । विद्योपाधिको भेदः । अत एव सोपाधिनिमित्तामपारमार्थिकीं विशेषवत्तामभिप्रेत्य जलसूर्यकादि-
वदित्युपादीयते मोक्षशास्त्रेषु । आकाशमेकं हि यथा घटादिषु पृथक्पृथक् । तथात्मैको ह्यनेकस्थो जलाधारेष्विवांशुमान् ॥ एक एव तु भूतात्मा

भूते भूते व्यवस्थितः ॥ एकधा बहुधा चैव दृश्यते जलचन्द्रवत् । तथा ह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोऽनुगच्छन् । उपाधिना क्रियते भेद-
रूपो देवः क्षेत्रेष्वेवमजोऽयमात्मा ॥ इति दृष्टान्तबलेनापि निर्विशेषमेव ब्रह्मेत्युपपाद्याम्बुवदग्रहणादित्यात्मनोऽमूर्त्तत्वेन सर्वगतत्वे जलसूर्या-
दिवन्मूर्त्तत्वेन भिन्नापदेशावस्थितत्वाभावाद्दृष्टान्तदार्ष्टान्तिकयोः सारूप्यं नास्तीत्याशङ्क्य वृद्धिह्रासभाक्त्वमिति । न हि दृष्टान्तदार्ष्टान्तिकयोर्वि-
वक्षितांशमुक्त्वा सर्वसारूप्यं केनचिद्दर्शयितुं शक्यते । सर्वसारूप्ये दृष्टान्तदार्ष्टान्तिकभावोच्छेद एव स्यात् । वृद्धिह्रासभाक्त्वमत्र विवक्षितम् ॥
जलगतसूर्यप्रतिबिम्बं जलवृद्धौ वर्धते जलह्रासे ह्रसति जले चलति चलति जलभेदे भिद्यत इत्येवं जलधर्मानुविधायि भवति न तु परमा-
र्थतः सूर्यस्य तत्त्वमस्ति । एवं परमार्थतोऽविकृतमेकरूपमपि सद्ब्रह्म देहाद्युपाध्यन्तर्भावाद्भजत इवोपाधिधर्मान् वृद्धिह्रासादीनीति विव-
क्षितांशप्रतिपादनेन दृष्टान्तदार्ष्टान्तिकयोः सामञ्जस्यमुक्त्वा दर्शितान्प्रति पुरश्चक्रे द्विपदः पुरश्चक्रे चतुष्पदः पुरः स पक्षी भूत्वा पुरः पुरुष
आविशत् । इन्द्रो मायाभिः पुरुरूप ईयते । मायिनं तु महेश्वरम् । मायी सृजते विश्वमेतत् । एकस्तथा सर्वभूतान्तरात्मा । रूपं रूपं प्रतिरूपो ब-
भूव । एको देवः सर्वभूतेषु गूढः । एतमेव सीमानं विदार्यैतया द्वारा प्रापद्यत । स एष इह प्रविष्ट आनखाग्रेभ्यः । तत्सृष्ट्वा तदेवानुप्राविशदित्या-
दिना परस्यैव ब्रह्मण उपाधियोगं दर्शयित्वा निर्विशेषमेव ब्रह्म । भेदस्तु जलसूर्यादिवदौपाधिको मायानिबन्धन इत्युपसंहृतवान् । किञ्च
ब्रह्मविदामनुभवोऽपि प्रपञ्चबाधकः तेषां निष्प्रपञ्चात्मदर्शनस्य विद्यमानत्वात् । न च तेषामनुभवं दर्शयति यस्मिन्सर्वाणि भूतान्यात्मैवाभू-
द्विजानतः । तत्र को मोहः कः शोक एकत्वमनुपश्यतः । विदिते वेद्ये नास्तीति । एवं निर्वाणमनुशासनम् । यत्र वान्यदिव स्यात्तत्रान्योऽन्यत्
पश्येत् । यत्र त्वस्य सर्वमात्मैवाभूत् । तत्केन कं पश्येत् । यदेतद्दृश्यते मूर्त्तमेतज्ज्ञानात्मनस्तव । भ्रान्तिज्ञानेन पश्यन्ति जगद्रूपमयोगिनः ॥

येन ज्ञानविदः शुद्धचेतसस्तेऽखिलं जगत्। ज्ञानात्मकं प्रपश्यन्ति तद्रूपं परमेश्वरम्॥ निदाघोऽप्युपदेशेन तेनाद्वैतपरोऽभवत्। सर्वभूतान्यशेषे
ण ददर्श स तदात्मनः॥ तथा ब्रह्म ततो मुक्तिमवाप परमां द्विज। अत्रात्मव्यतिरेकेण द्वितीयं यो न पश्यति। ब्रह्मभूतः स एवेह वेदशास्त्र उदाहृतः॥
इत्येवं श्रुतिस्मृतियुक्तितोऽनुभवतश्च प्रपञ्चस्य बाधितत्वात् स्वतो विलक्षणो नाम सदृशः पाणौ मधुरतिक्तत्वे तपीतादीनामपि परस्पराध्यासदर्शना
दद्रूपं नैयायिकाद्युक्तं तत्त्वमलिनतादध्यासदर्शनादात्मानात्मनोरत्यन्तविलक्षणयोर्मूर्त्तामूर्त्तयोरपि तथा सम्भवात् स्थूलोऽहं कृशोऽहमिति देहात्म
२१५ नोऽध्यासानुभवात्। हन्ता चेन्मन्यते हन्तुं हतश्चेन्मन्यते हतम्। उभौ तौ न विजानीतो नायं हन्ति न हन्यते इत्यादिश्रुतिस्मृतिदर्शनात्। य एनं वेत्ति हन्ता

कृष्णयजुर्वेदीयश्वेताश्वतरोपनिषत्। ॐ॥ ब्रह्मवादिनो वदन्ति। किं कारणं ब्रह्म कुतः स्म जाताः

रं प्रश्नैः क्रियमाणेनीति स्मृतिदर्शनाच्चाध्यासस्य। प्रहाणाय चात्मैकत्वविद्याप्रतिपत्तये उपनिषदारभ्यते ब्रह्मवादिनो वदन्तीत्यादि श्वेताश्वत
राणां मन्त्रोपनिषत्। तस्याश्चाल्पग्रन्था वृत्तिरारभ्यते। ब्रह्मवादिनः ब्रह्मवदनशीलाः सर्वे समभ्युपवदन्ति। किं कारणं ब्रह्म। किमिति स्वरूपविषयोऽयं
प्रश्नः। अथवा कारणं ब्रह्म आहोस्वित् कालादि कालस्वभाव इति वक्ष्यमाणम्। अथवा किं कारणं ब्रह्म सिद्धरूपमुपादानम् उत किमित्यथः। अ
थवा नृह्यति बृंहयति तस्मादुच्यते परं ब्रह्मेति श्रुतेर्वा निर्वचनान्निमित्तोपादानयोरुभयोर्वा प्रश्नः। किं कारणं ब्रह्मेति किं ब्रह्म कारणम् आहो
स्वित् कालादि। अथवाऽकारणमेव। कारणत्वेऽपि किं निमित्तमुतोपादानमथवोभयम्। तदा किं लक्षणमिति। वक्ष्यमाणपरिहारानु
रूपेण तत्त्रैगुण्यं वा प्रश्नेऽपि संग्रहः कर्तव्यः प्रश्नापेक्षितत्वात् परिहारस्य॥ कुतः स्म जाताः कुतो वयं कार्यकारणवन्तो जाताः। न स्वरूपेण जी
वानामुत्पत्त्याद्यसम्भवात्। तथा च श्रुतिः। न जायते म्रियते वा विपश्चित्। जीवापेतं वाव किलेदं म्रियते न जीवो म्रियते इति। जरायुजस्य शरीरस्य श्रवि

श्वे० ८

किञ्च जीवात्मकेन केन वयं सृष्टाः सन्तो जीवाम इति स्थितिविषयः प्रश्नः। क्व च संप्रतिष्ठाः प्रलयकाले स्थिताः। अधिष्ठिता नियमिताः। केन सुखे-
तरेषु सुखदुःखेषु वर्तामहे। ब्रह्मविदो व्यवस्थाम्। हे ब्रह्मविदः सुखदुःखेषु व्यवस्थाः केनाधिष्ठिताः सन्तोऽनुवर्तामहे इति सृष्टिस्थितिप्रलयनिय-
मे हेतुः किमिति प्रश्नसंग्रहः १ इदानीं कालादीनि ब्रह्मकारणत्वेन प्रतिपन्नभूतानि विचारविषयत्वेन दर्शयति कालः स्वभाव इति योनिशब्दः स-
म्बध्यते। कालो योनिः कारणं स्यात्। कालो नाम सर्वभूतानां विपरिणामहेतुः। स्वभावः। स्वभावो नाम पदार्थानां प्रतिनियता शक्तिः अग्नेरौष्ण्यमि-
व। नियतिरविषमपुण्यपापलक्षणं कर्म तद्वा कारणम्। यदृच्छा आकस्मिकी प्राप्तिः। भूतानि आकाशादीनि वा। योनिः पुरुषो विज्ञानात्मा
योनिः। इति इत्थमुक्तेन प्रकारेण किं योनिरिति चिन्त्या चिंतं [redacted] निरूपणीयम्। केचिद्योनिशब्दं प्रकृतिं वर्णयन्ति तस्मिन्पक्षे किं कारणं

जीवाम केन क्व च संप्रतिष्ठिताः। अधिष्ठिताः केन सुखेतरेषु वर्तामहे ब्रह्मविदो व्यवस्थाम् १ कालः स्वभावो नियतिर्यदृच्छा
भूतानि योनिः पुरुष इति चिन्त्या। संयोग एषां नत्वात्मभावादात्माप्यनीशः सुखदुःखहेतोः २

ब्रह्मेति कारणपदमत्राप्यनुसंधेयम्। न तत्र कालादीनामकारणत्वं दर्शयति संयोग एषामित्यादिना। अयमर्थः किं कालादीनि प्रत्येकं कारणमु-
त तेषां समूहः। न च प्रत्येकं कालादीनां कारणत्वं संभवति दृष्टविरुद्धत्वात् दृष्टाः कालनिमित्तानां सहितानामेव लोके कार्यकरत्वदर्शनात्। नचा-
प्येषां कालादीनां संयोगः समूहः कारणं समूहस्य संहतेः परार्थत्वाच्छेषत्वेन शेषिण आत्मनो विद्यमानत्वात् तस्मान्न्यायः सृष्टिस्थितिप्रलयनि-
यमलक्षणकार्यकारणत्वायोगात्। आत्मा तर्हि कारणं स्यादित्यत आह आत्माप्यनीशः सुखदुःखहेतोः। आत्मा जीवोऽप्यनीशः स्वतन्त्रो न का-
रणम्। अस्वातन्त्र्यादेव चात्मनोऽपि स्रष्टादिहेतुत्वं न संभवतीत्यर्थः। कथमनीशत्वम्। सुखदुःखहे तोः सुखदुःखहेतुमद्भूतस्य पुण्यापुण्यलक्षण

वेत्यर्थः। अथवा हेत्वड्डुः क्वादिहेतुम् तस्याध्यात्मिकादिभेदभिन्नस्य जगतोऽधिष्ठानकारणम् २ एवं प्रमाणान्तराणि निराकृत्य प्रमाणान्तरा-
गोचरे वस्तुनि प्रकारान्तरमपश्यन्तो ध्यानयोगानुगमेन परमकारणं स्वयमेव प्रतिपेदिरे। ते ध्यानयोगेति ध्यानं चित्तैकाग्र्यं तदेव योगो
युज्यतेऽनेनेति ध्यातव्यालीकारोपायत्वमनुगताः समाहिता अपश्यन् दृष्टवन्तः। देवात्मशक्तिमिति पूर्वोक्तमेवमनूद्यापरिहाराणामुत्तरमु-
त्तरत्वप्रत्येकप्रपञ्चयिष्यते तत्रायं प्रश्नसंग्रहः। किं ब्रह्म कारणमाहोस्वित्कालादितया। किं कारणं ब्रह्म आहोस्वित् कार्यकारणविलक्ष-
णम्। अथवा कारणं वा अकारणं वा। कारणत्वेऽपि किमुपादानमुत निमित्तमथवोभयं कारणं ब्रह्म किंलक्षणमकारणं वा ब्रह्म किंलक्षण-
मिति। तत्रायं परिहारः। न कारणं नाप्यकारणं ब्रह्म न चोभयं नाप्यनुभयं न च निमित्तं न चोपादानं न चोभयमेतदुक्तं भवति अद्वितीयस्य पर-

ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढाम्। यः कारणानि निखिलानि तानि कालात्मयुक्तान्यधितिष्ठत्येकः ३

मात्मनो न स्वतः कारणत्वमुपादानत्वं निमित्तत्वं वा। यदुपाधिकस्य कारणत्वादि तदेव कारणनिमित्तमुपपाद्य तदेव प्रयोजकं निष्कृष्य दर्शया-
ति देवात्मशक्तिमिति देवस्य द्योतनादियुक्तस्य मायिनो महेश्वरस्य परमात्मन आत्मभूतामस्वतन्त्रां न सांख्यपरिकल्पितप्रधानादिवत्पृथग्-
भूतां स्वतन्त्रां शक्तिं कारणमपश्यन् दर्शयिष्यति च मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरमिति। तथा ब्राह्मे। एषा चतुर्विंशतिभेदभिन्ना
मायापरा प्रकृतिस्तस्य शुभा। तथा च। मयाध्यक्षेण प्रकृतिः सूयते सचराचरम्। इति स्वगुणैः प्रकृतिकार्यभूतैः पृथिव्यादिभिश्च निगूढा-
संवृताम्। कार्याकारेण कारणाकारस्याभिभूतत्वात्। कार्यात्पृथक्स्वरूपेणोपलब्धुमयोग्यामित्यर्थः। तथा च प्रकृतिकार्यत्वं गुणानां दर्श-
यति व्यासः। सत्त्वं रजस्तम इति गुणाः प्रकृतिसम्भवा इति। कोऽसौ देवो यस्यैषा विश्वजननी शक्तिरभ्युपगम्यते इत्यत्राह यः कारणानि निखिलानि

श्वे० भा० ६ तानि सर्वाणि कालात्मयुक्तानि कालात्मभ्यां युक्तानि कालपुरुषसंयुक्तानि स्वभावादीनि कालस्वभाव इति मन्त्रोक्तान्यधि तिष्ठति नियमयति एको श्वे०१
ऽद्वितीयः। यो द्वितीयः परमात्मा तस्य शक्तिं कारणमपश्यन्निति वाक्यार्थः। अथवा देवात्मशक्तिं देवात्मना ईश्वररूपेणावस्थितां शक्तिम्। तथा च स
र्वभूतेषु सर्वात्मन् या शक्तिरपरा भवेत्। गुणाश्रया नमस्तस्यै शाश्वतायै परेश्वर। यातीता गोचरा वाचां मनसां चाविशेषणा। ज्ञानध्यानप
रिच्छेद्या तां वन्दे देवतां परामिति। प्रपञ्चयिष्यति। स्वभावादिनाम कारणत्वमशक्तानशेषकारणत्वेन स्वभावमेकमेव यो वन्दनीयतादि। मायी सृज
ते विश्वमेतत्। एको [redacted] रुद्रो न द्वितीयोऽवतस्थे। एको वर्णो बहुधा शक्तियोगादित्यादि। स्वगुणैरीश्वरगुणैः सर्वज्ञत्वादिभिः सत्त्वादिभिर्निगूढां मि ५
कार्यकारणविनिर्मुक्तस्वरूपेण निर्गुणत्वात् द्वितीयब्रह्मात्मनैवानुपलभ्यमानाम्। कोऽसौ देवः यः कारणानीत्यादि पूर्ववत्। अथवा देवस्य परमे
श्वरस्यात्मभूतां जगदुदयस्थितिलयहेतुभूतां ब्रह्मविष्णुशिवात्मिकां शक्तिमिति तथा चोक्तम्। शक्तयो यस्य देवस्य ब्रह्मविष्णुशिवा
त्मिका इति ब्रह्मविष्णुशिवा ब्रह्मन् प्रधाना ब्रह्मशक्तय इति च। स्वगुणैः सत्त्वरजस्तमोभिः। सत्त्वेन विष्णुः। रजसा ब्रह्मा। तमसा महेश्वरः।
सत्त्वादि उपाधिसम्बन्धस्वरूपेण निरुपाधिकस्वरूपेण न त्वाद्वितीयब्रह्मात्मनैवानुपलभ्यमानाः परस्यैव ब्रह्मणः सृष्ट्यादिकार्ये कुर्वतोऽ
वस्थाभेदमाश्रित्य शक्तिभेदव्यवहारानेव न तत्त्वभेदमाश्रित्य। तथा चोक्तम्। सर्गस्थित्यन्तकारिणीं ब्रह्मविष्णुशिवात्मिकाम्। स सं
ज्ञां याति भगवानेक एव जनार्दनः। इति प्रथममीश्वरात्मना मायिरूपेणावतिष्ठते ब्रह्म। स पुनर्मूर्तिरूपेण त्रिधा व्यवतिष्ठते। तेन च रू
पेण सृष्टिस्थितिनियमनादिकार्यं करोति। तथा च श्रुतिः। परस्य शक्तिद्वारेण नियमनादिकार्यं दृश्यते लोकानीशत ईशनीभिः प्र
त्यञ्जनास्तिष्ठति संचुकोप। अन्तकाले संसृज्य विश्वा भुतानि गोपायति। ईशते ईशनीभिर्जननीभिः परमशक्तिभिरिति विशेषणात्॥ ५

ब्रह्मविष्णुशिवाब्रह्मन् प्रधानाब्रह्मशक्तयः। विकल्पशक्तिः स्मृता मोक्षे स्मृतेः परमशक्तिभिः॥ इति परमदेवतानां ग्रहणम्। अथवा देवात्मश
क्तिमिति देवश्चात्मा च शक्तिश्च यस्य परस्य ब्रह्मणः तस्याभेदात्मा प्रकृतिपुरुषेश्वराणां स्वरूपभूतां ब्रह्मरूपेणावस्थितां परात् परतरां श
क्तिं कारणमपश्यन्निति। तथा च त्रयाणां स्वरूपभूतां प्रदर्शयिष्यति भोक्ता भोग्यं प्रेरितारं च मत्वा सर्वं प्रोक्तं ब्रह्मणैतत्। त्रयं यदा विन्दते ब्रह्म
एतदिति। स्वगुणैर्ब्रह्मपरतन्त्रैः प्रकृत्यादिविशेषणैः रूपादिभिर्निगूढाम्। तथा च दर्शयिष्यति। एको देवः सर्वभूतेषु गूढ इति। तं दुर्दर्शं गूढम
नुप्रविष्टमिति श्रुतेः। यो वेद निहितं गुहायाम्। इहैव सन्तं न विजानन्ति देवा इति श्रुत्यन्तरम्। यः कारणानीति पूर्ववत्। अथवा देवात्मनः
द्योतनात्मनः प्रकाशस्वरूपस्य ज्योतिषां ज्योतीरूपस्य प्रज्ञानघनरूपस्य परमात्मनो जगदुदयस्थितिनियमनविषयां शक्तिं सामर्थ्यमपश्यन्नि
ति स्वगुणैः स्वव्यष्टिभूतैः सर्वज्ञसर्वशक्तित्वादिभिर्निगूढां तन्नहिशेषरूपेणावस्थितत्वात् स्वरूपेण शक्तिमात्रेणानुपलभ्यमानाम्। तथा च^
मानान्तरैर्येषां शक्तिं दर्शयिष्यति। न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते। परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञान
बलक्रिया चेति॥ समानमन्यत्। कारणं देवात्मशक्तिमिति प्रश्नपरिहारे च ये ये पक्षभेदाः प्रदर्शितास्ते सर्वे संगृहीताः। उत्तरत्र सर्वेषां प्रपञ्च^
५४ नाद्वैतस्य प्रपञ्चनायोगात् प्रश्नोत्तरदर्शनाच्च। समानस्यास्य साधारणस्य च विदुषामिष्टत्वात्। तथा चोक्तम्। इहैव हि विदुषां लोके समा
सव्यासधारणमिति। तथा च श्रुत्यन्तरे। स क्रतुं तस्य गोपामिति। पदस्य व्याख्याभेदः श्रुत्यैव प्रदर्शितः। अपश्यं गोपामित्याह प्राणो वै गोपा इति
अपश्यन् गोपामित्याह। असौ वा आदित्यो गोपा इति। अथ कस्मादुच्यते ब्रह्मेत्यारभ्य बृह[illegible]यद्ब्रह्म यद्ब्रह्मेति तस्मादुच्यते परं ब्रह्मेति सकृ
च्चक्षुतस्यतद्ब्रह्मपदस्य निमित्तोपादानरूपेणार्थभेदः श्रुत्यैव दर्शितः। एवं तावद्देवात्मशक्तिम्। यः कारणानि निखिलानि कालात्मना युक्तान्यधितिष्ठ

श्री० मां० १

त्येकइति। एकस्याद्वितीयस्य परमात्मनः स्वरूपेण शक्तिरूपेण च निमित्तकारणोपादानकारणत्वमायित्वेनेश्वररूपत्वे देवतात्मत्वसर्वज्ञ
त्वादिरूपत्वं सत्यज्ञानानन्दाद्वितीयरूपत्वञ्च समासेन श्रुत्यर्थाभ्यामभिहितम्। इदानीं तमेवसर्वात्मानं दर्शयति कार्यकारणयोरनन्यत्वप्रति
पादनेन। वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यमिति निर्दिष्टेन नाद्वितीयात्पूर्वान्नपरं नेति नेत्यात्मकवागगोचराप्रमेयाद्यं संसृ
ष्टप्रत्यस्तमितभेदचिदानन्दब्रह्मात्मत्वप्रदर्शयितव्यमना अपकृतैप्रपञ्चभ्रान्त्यामवस्थाप्राज्ञस्य परब्रह्मण ईश्वरात्मनः सर्वज्ञत्वापह
तपाप्मादिरूपेण देवतात्मना ब्रह्मादिरूपेण कार्यादिरूपेण वैश्वानरादिरूपेण च मात्रापेक्षितस्तुष्टुपर्थाभ्युपदिपित लोककाम इति विशेषस्या
र्थीभ्यमावानित्येषां करं वाप्नयाति। साधर्म्यान्नाविश्लेषेण मामहं देवस्त्वं तथा इन्द्रादिदेवतासायुज्य प्राप्त्यर्थो वैश्वानरप्राप्त्यर्थोपासना
र्थीमशेषलौकिकवैदिककर्मप्रसिद्धाश्च' यदि कार्यकारणरूपेण चिदानन्दाद्वितीयब्रह्मात्मना च सावस्थितो न स्यात् तदा भोगमोक्षा^
नियन्तृभावे संसारमोक्षयोरभाव एव स्यात्। अधिकारिणः भावेन साधनस्य तस्य प्रपञ्चस्याभावात्। तथा संसारादिमन्तमीश्वरं दर्शयति। सं
सारमोक्षस्थितिबन्धहेतुरिति' तथा च संसारमोक्षयोरभाव एव स्यात्। ततस्तिद्दर्शस्वपं चाद्यवस्थानं दर्शयति। एकं पादं नोत्क्षिपति स^
लिलाद्धंस उच्चरन्। स चेदृति न्दद्दानन्दं न सत्यं नात्यन्तं भवेत्॥ सन्तत्त्वज्ञातेऽपि। एकं पादं नोत्क्षिपति इत्यादि। तथा च श्रुतिः। पादोऽस्य विश्वा
भूतानि त्रिपादस्यामृतं दिवीति तच्च प्रथमेन मन्त्रेण ॥३॥

श्री० २

सर्वात्मानं ब्रह्मचक्रं दर्शयति द्वितीयेन नदीरूपेण। तमेकेति यदेकः कारणेति निखिलानि अधितिष्ठति तमेकनेमिं। यो निःकारणमारभ्याकृ
तमाकाशं परमव्योम माया प्रकृतिः शक्तिः तमोऽविद्याछाया अज्ञानमनृतमव्यक्तमित्यादिशब्दैरभिलप्यमाना एकाकारणावस्था नेमि
रिव नेमिः सर्वाधारो यस्याधिष्ठातुरद्वितीयस्य परमात्मनस्तमेकनेमिम्। त्रिवृतं त्रिभिः सत्त्वरजस्तमोभिः प्रकृतिगुणैर्वृतम्। षोडशाकारावि
कारः पञ्चभूतान्येकादशेन्द्रियाणि अन्तोऽवसानं विलयस्थानं यस्यात्मनस्तं षोडशान्तम्। अथवा प्रश्नोपनिषदि यस्मिन्नेताः षोडशक
लाः प्रभवन्तीत्यारभ्य स प्राणमसृजत प्राणाच्छ्रद्धामित्यादिनाभिहिताः षोडशकला अवसाने यस्येति। अथवा एकनेमिमिति कारणभूता
व्याकृतावस्थाभिहिता। तत्कार्यं समष्टिभूतविराट्सूत्रद्वयम्। तद्व्यष्टिभूतं भूरादिचतुर्दशभुवनानि अन्तोऽवसानं यस्य प्रपञ्चात्मनाव

तमेकनेमिं त्रिवृतं षोडशान्तं शतार्धारं विंशतिप्रत्यराभिः। अष्टकैः षड्भिर्विश्वरूपैकपाशं त्रिमार्गभेदं द्विनिमित्तैकमोहम् ४

स्थितस्तं षोडशान्तम्। शतार्धारम्। पञ्चाशत्प्रत्ययभेदविपर्ययाशक्तितुष्टिसिद्ध्याख्या अराश्च यस्य तं शतार्धारम्। पञ्चविपर्ययभेदाः।
तमो मोहो महामोहस्तामिस्रो ह्यन्धतामिस्र इति। शक्तिरष्टाविंशति। तुष्टिर्नवधा। अष्टधा सिद्धिः। एते पञ्चाशत्प्रत्ययभेदाः। तत्र तमसो भेदोऽष्ट
विधः। अष्टसु प्रकृतिष्वात्मना आत्मप्रतिपत्ति विषयभेदेनाष्टविधत्वम्। प्रतिपत्तेर्मोहस्य चाष्टविधो भेदः। अणिमादिष्वासक्तिर्मोहः। दशविधो
महामोहः। दृष्टानुश्रविकशब्दादिविषयेषु पञ्चसु पञ्चस्वभिनिवेशो महामोहः। दृष्टानुश्रविकभेदेन तेषां दशविधत्वम्। तामिस्रोऽष्टादशविधः।
दृष्टानुश्रविकेषु दशसु विषयेष्वष्टविधैरैश्वर्यैः प्रयतमानस्य तदसिद्धौ यः क्रोधः स तामिस्रोऽभिधीयते। अन्धतामिस्रोऽप्यष्टादशविधः। अ
ष्टविधैश्वर्ये दशसु विषयेषु भोग्यत्वेनोपस्थितेष्वहं भुक्षेषु मृत्युनाह्रियमाणस्य यः शोको जायते महता क्लेशेनैते प्राप्ता न चैते मयोपभुक्ताः। प्र

स्ते० मा० ११

तासमन्त्यमं मरणकाल इति सोऽन्धतामिस्र उच्यते। विपर्ययभेदा व्याख्याताः। शक्तिरष्टाविंशतिधोच्यते। एकादशेन्द्रियाणां शक्तयः मूकत्वब
धिरत्वान्धत्वप्रभृतयो बाह्याः। अन्तःकरणस्य तुष्ट्यर्थयोग्यताहीनो विपर्ययेण तुष्ट्याशक्तिः। तुष्टिर्नवधा। प्रकृत्युपादानकालभागाश्चत
स्रः। विषयोपरमाः पञ्च। कश्चित्प्रकृतिपरिज्ञानात् कृतार्थोऽस्मीति मन्यते स पुनः पारिव्राज्यलिंगं गृहीत्वा कृतार्थोऽस्मीति मन्यते। अपरः पु
नः प्रकृतिपरिज्ञानेन किमाश्रमाद्युपादानेन वा किं बहुना कालेनापवर्गप्राप्तिर्भवतीति मत्वा परितुष्यति। कश्चित्तु मन्यते विना भाग्येन न कि
ञ्चिदपि प्राप्यते यस्मिन्काले तत्तद्भवत्येवास्य मोक्ष इति परितुष्यति। विषयाणामर्जने महाश्रम इत्युपारम्य तुष्यति। प्राप्ते ऽपि दुःखमर्जितमर्जि
तस्य रक्षणमपि महाक्लेश इत्युपारम्य परितुष्यति। सातिशयत्वादिदोषदर्शनेनोपारम्य परितुष्यति। विषयाः स्वतरामेवाभिलाषं जनयन्ति न चत
त्कोगाभ्यासे तृष्णोपजायते। न जातु कामः कामानामुपभोगेन शाम्यति। हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते इति। तस्मादलमनेन पुनः पु
नरसन्तोषकारणेनोपभोगेन। एवं संगदोषदर्शनादुपारम्य कश्चित्तुष्यति। नानुपहत्य भूतान्युपभोगाः सम्भवन्तीति भूतोपघातभोगाद्धा
धर्मो ऽधर्मान्नरकादिप्राप्तिरिति हिंसादोषदर्शनात्कश्चिदुपारम्य तुष्यति। प्रकृत्युपादानकालभाग्याख्याश्चतस्रः। विषयाणामर्जनरक्षण
सद्द्वा विषयसंगहिंसादोषाच्च पञ्च इति नव तुष्टयो व्याख्याताः। सिद्धयोऽभिधीयन्ते। ऊहः शब्दोऽध्ययनमिति। तिस्रः सिद्धयः। दुःखविघातास्त्र
यः। सुहृत्प्राप्तिर्दानमिति सिद्धिद्वयम्। ऊहस्तत्त्वजिज्ञासमानस्य। उपदेशमन्तरेण जन्मान्तरसंस्कारवशात्प्रकृत्यादिविषयं ज्ञानमुत्प
द्यते सेयमूहो नाम प्रथमा सिद्धिः। शब्दो नामाभ्यासमन्तरेण श्रवणमात्रेण यज्ज्ञानमुत्पद्यते सा द्वितीया सिद्धिः। अध्ययनं नाम शास्त्राभ्यासे सा
ज्ञानमुत्पद्यते सा तृतीया सिद्धिः। आध्यात्मिकस्याधिभौतिकस्याधिदैविकस्य त्रिविधदुःखस्य विघातात् त्रीणि सिद्धिजनादुःखसहितोऽसि

११

तितोर्यज्ञानमुत्पद्यते तस्याऽऽध्यात्मिकादिभेदात् सिद्धेर्वैविध्यम्। ऊहः, ऊहं प्राप्य या सिद्धिर्ज्ञानस्य सा ऊहः, स्वाप्नेनीमसिद्धिः। आचार्याद्
तत्त्वस्य श्रवणेन या सिद्धिर्विद्यायाः सा श्रवणं नाम सिद्धिः। एवमष्टविधा सिद्धिर्विख्याता। एवं विपर्ययाशक्तितुष्टिसिद्ध्याख्याः पञ्चाशत्प्रत्ययभे
दा व्याख्याताः। एवं ब्रह्मस्वरूपाणां कल्पाप निषद्याख्यानग्रहेषु ष्टितं त्वाध्याये पञ्चाशत्प्रत्ययभेदाः प्रतिपादिताः। अथवा पञ्चाशत्प्रकि
रूपिणी इति। परस्याः शक्तयः प्राणेश्वरूपत्वेनाभिमताः पञ्चाशच्छक्तयः अकारादयः पन्ते शतार्धारं विंशतिप्रसरा दशेन्द्रियाणि तेषां च विषा
याः पूर्ववत् शब्दस्पर्शरूपरसगन्धवचनादानविहरणोत्सर्गानन्दाः। पूर्वोक्तानामराणां प्रत्यराये प्रतिविधीयन्ते कीलकाः अराणां दार्ढ्याय ते प्रत्य
रा उच्यन्ते। तैः प्रत्यरैर्युक्तमष्टकैः षड्भिर्युक्तमिति योजनीयम्। भूमिरापोनलो वायुः खं मनो बुद्धिरेव च। अहंकार इतीयं मे भिन्ना प्रकृतिर
त्ये ष्टधा इति प्रकृत्यष्टकम्। त्वक्चर्ममांसरुधिरमेदोस्थिमज्जाशुक्राणि धात्वष्टकम्। अणिमाद्यैश्वर्याष्टकम्। धर्मज्ञानवैराग्यैश्वर्याधर्माज्ञानावै
राग्यानैश्वर्याख्यो भावाष्टकम्। ब्रह्मप्रजापतिदेवगन्धर्वयक्षराक्षसपितृपिशाचा देवाष्टकम्। अष्टावात्मगुणा ज्ञेयाः। दया सर्वभूतेषु क्षान्ति
रनसूया शौचमनायासो मंगलमकार्पण्यमस्पृहेति गुणाष्टकं षष्ठम्। एतैः षड्भिर्युक्तं विश्वरूपैकपाशम्। स्वर्गपुत्रान्नाद्यादिविषय^
भेदात्। विश्वरूपं विश्वरूपो नानारूपः। एकः कामाख्यः पाशोऽस्येति विश्वरूपैकपाशः। धर्माधर्मज्ञानमार्गभेदात् त्रयोऽस्येति त्रिमार्गभे
दम्। द्वयोः पुण्यपापयोर्निमित्तैकमोहः। देहेन्द्रियमनोबुद्धिजात्यादिष्वनात्मस्वात्माभिमानोऽस्येति द्विनिमित्तैकमोहम्। अपपुष्प^ मं३।३
त्मिनि क्रियापदमनुवर्त्तते। अधीमः स्मरन्तमिदं वा क्रियापदम्। ४॥

श्वे० भा० १२ सर्वं चक्ररूपेण दर्शितमिदानीं नदीरूपेण दर्शयति पञ्चस्रोत इति पञ्चस्रोतांसि चक्षुरादीनि ज्ञानेन्द्रियाणि अम्बुस्थानानि यस्यास्तां नदीं प^
ञ्चस्रोतोम्बुम्। अधीम इति सर्वत्र संबध्यते पञ्चयोनिभिः कारणभूतैः पञ्चभूतैः उग्रवक्रां पञ्चयोन्युग्रवक्राम्। कर्मेन्द्रियाणि प्राणादयो वा ऊर्म
यो यस्यास्ताम्। पञ्चबुद्धीनां चक्षुरादिजन्यानां ज्ञानानामादिकारणं मनः। मनो वृत्तिरूपत्वात् सर्वज्ञानानां मनोमूलं कारणं यस्यास्तां संसारसरि
तं ताम्। तथा च मनसः सर्वहेतुत्वं दर्शयति मनोविजृम्भितं सर्वं यत्किंचित् चराचरम्। मनसो ह्यमनीभावे द्वैतं नैवोपलभ्यत इति
यो०५ पञ्चशब्दादिविषया आवर्तस्थानीया यास्वेषु विषयेषु प्राणिनो निमज्जन्तीति यस्यास्तां पञ्चावर्ताम्। गर्भदुःखं जन्मदुःखं जरादुःखं व्याधि

पञ्चस्रोतोम्बुं पञ्चयोन्युग्रवक्राम्। पञ्चप्राणोर्मिं पञ्चबुद्ध्यादिमूलां पञ्चावर्तां पञ्चदुःखौघवेगां पञ्चाशद्भेदां पञ्चपर्वामधीमः ५
सर्वाजीवे सर्वसंस्थे बृहन्ते अस्मिन् हंसो भ्राम्यते ब्रह्मचक्रे ॥

दुःखं मरणदुःखानि यस्यास्तां पंचदुःखौघवेगाम्। अविद्यास्मितारागद्वेषाभिनिवेशाः पञ्चक्लेशभेदाः पञ्चपर्वाणि यस्यास्तामिति। ए पञ्चाश द्भेदां पञ्च र्वां।२
र्वधीमः वंतावन्नदीरूपेण ब्रह्म च चक्ररूपेण च कार्यकारणात्मकं ब्रह्म समग्रं पञ्चभिरभिहितम्। ५ इदानीमस्मिन् कार्यकारणात्मके ब्रह्मचक्रे केन वा
यो०२ संसरति केन वा मुच्यत इति संसारमोक्षहेतुदर्शनार्थं सर्वाजीवे इति। सर्वेषामाजीवनमस्मिन्निति सर्वाजीवे। सर्वेषां संस्थासमाप्तिः प्रल
यो यस्मिन्निति सर्वसंस्थे। बृहन्ते स्मिन् हंसो जीवः। हन्ति गच्छत्यध्वानमिति हंसः। भ्राम्यते अनात्मभूतदेहादिमात्मानं मन्यमानः सुर
नरतिर्यगादिभेदभिन्ननानायोनिषु। एवं भ्राम्यमाणः परिवर्तते इत्यर्थः। केन हेतुना नानायोनिषु प्रवर्तन्ते इति तत्राह पृथगात्मानं प्रेरिता

ततः इति तत ईश्वरतः जुष्टः एकत्वेन।२

रं च मत्वेति। आत्मानं जीवात्मानं प्रेरितारं चेश्वरं पृथग्भेदेन मत्वा ज्ञात्वा अन्योऽसावन्योऽहमस्मीति जीवेश्वरभेददर्शनेन संसारे परिवर्तत इत्यर्थः। केन मुच्यत इत्याह [illegible] सेवितः तेन ईश्वरेणाभिन्नत्वेन सदानंदाद्वितीयब्रह्मात्मनाऽहं ब्रह्मास्मीति समाधानं कृत्वेत्यर्थः। तेनेश्वरसेवनादमृतत्वमेति। यस्तु पूर्णानंदब्रह्मस्वरूपेणात्मानमवगच्छति स मुच्यते। यस्तु परमात्मनोऽन्यमात्मानं जानाति स बध्यत इति। तथा च बृहदारण्यके भेददर्शिनस्य संसारहेतुत्वं प्रदर्शितं य एवं वेदाहं ब्रह्मास्मीति स इदं सर्वं भवतीति। तस्य ह न देवाश्चनाभूत्या ईशते। आत्मा ह्येषां स भवति। अथ योऽन्यां देवतामुपास्तेऽन्योऽसावन्योऽहमस्मीति न स वेद यथा पशुरेवं स देवानामिति। तथा च श्रीविष्णुधर्मे पश्यत्यात्मानमन्यं तु यावद्वै परमात्मनः। तावत्स भ्राम्यते जंतुर्मोहितो नि

पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेति।६। उद्गीतमेतत्

जकर्मणा॥ संक्षीणाशेषकर्मणा तु परं ब्रह्म प्रपश्यति। अभेदेनात्मनः शुद्धं शुद्धत्वादक्षयो भवेत्।६। ननु त्वमेकयोनिरित्यादिना सप्रपंचं ब्रह्म प्रतिपादितं। तथा च सत्यं हं ब्रह्मास्मीति ब्रह्मात्मप्रतिपन्नावपि सप्रपंचस्यैव ब्रह्मण आत्मत्वेनावगमात्तं यथायथोपासते तदेव भवतीति सप्रपंचब्रह्मप्राप्तिरेव स्यात्। ततश्च प्रपंचस्यापरित्यागान्न मोक्षसिद्धिः ततश्च जुष्टः ततस्तेनामृतत्वमेतीति मोक्षोपदेशोऽनुपपन्न एवेत्याशंक्याह। उद्गीतमिति सप्रपंचं ब्रह्म यदि स्यात्ततो भवत्येव मोक्षाभावः न त्वेतदस्ति। कस्मात् तत्। उद्गीतं गीतमुपदिष्टं कार्यकारणलक्षणात् प्रपंचाद्वेदांतैः। अन्यदेव तद्विदितादथो अविदितादधि इति देव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते। अस्थूलमनण्वह्रस्वमस्पर्शं स एष नेति नेतीति। ततो यदुत्तरं। अन्यत्र धर्मात्। न सन्न चासच्छिव एव केवलः। तमसः परः। यतो वाचो निवर्तंते। यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति। स भूमा। योऽशनायापिपासे शोकं मोहं जरां मृत्युमत्येति। अप्राणो ह्यमनाः परतः परः। एकमेवाद्वितीयं। वाचारंभणं विकारो नामधेयं। नेह नानास्ति किंचन। एकधैवानुद्रष्टव्यं। इत्येवमादिभि

देवानामिति दुर्भवति।४

एतत्प्रकृतं यद्ब्रह्म

भूतानि योनिषु

श्वे० यत एवं प्रपंचधर्मरहितं ब्रह्म अत एव परमं तु ब्रह्म तु शब्दोऽवधारणे परममेव उत्कृष्टमेव संसारधर्मानास्कंदितत्वा
भा० त् उद्गीतत्वेन ब्रह्मण उत्कृष्टत्वात् तं यथा यथोपासते इति न्यायेनोत्कृष्टब्रह्मोपासनात् उत्कृष्टमेव फलं मोक्षाख्यं भवत्येवेत्य
१३ भिप्रायः। नन्वेवं तर्हि ब्रह्मणः प्रपंचसंस्पृष्टत्वे प्रपंचस्यापि पृथक्सिद्धत्वेन स्वतंत्रत्वात् वाचारंभणं विकारो नामधेयमिति
पारतंत्र्याभ्युपगमेन मिथ्यात्वोपदेशपूर्वकमद्वितीयब्रह्मात्मत्वेनोपदेशोऽनुपपन्न इत्याशंक्याह तस्मिंस्त्रयमिति यद्यपि
ब्रह्म प्रपंचासंस्पृष्टं स्वतंत्रं च तथापि प्रपंचो न स्वतंत्रः। अपि तु तस्मिन्नेव ब्रह्मणि त्रयं प्रतिष्ठितं भोक्ता भोग्यं प्रेरितारमिति वक्ष्य
माणं भोग्यभोक्तृनियंतृलक्षणं अजा ह्येका भोक्तृभोग्यार्थप्रयुक्ता इति वक्ष्यमाणं भोक्तृभोग्यरूपं वान्यद्दृश्रुतिसिद्धं विराट्सूत्राभ्यां

परमं तु ब्रह्म तस्मिंस्त्रयं सुप्रतिष्ठाऽक्षरं च ॥ ॥

कृतनामरूपकर्म विश्वतैजसप्राज्ञ जाग्रत्स्वप्नसुषुप्तिरूपस्वरूपं प्रतिष्ठितं रज्ज्वामिव सर्पः। य एतस्मिन् सर्वं भोक्त्रादिलक्षणं
प्रपंचरूपं प्रतिष्ठितं। अत एवास्य भोक्त्रादित्रयात्मकस्य प्रपंचस्य ब्रह्म सुप्रतिष्ठा शोभनप्रतिष्ठा। ब्रह्मणोऽन्यस्य चलनात्मकत्वा
त्। चलप्रतिष्ठाऽन्यत्र। ब्रह्मणोऽचलत्वादत्राऽचलप्रतिष्ठा। नन्वेवं तर्हि विकारभूतप्रपंचाश्रयत्वेन परिणामित्वाद् घटादिव
दनित्यं स्यादित्याशंक्याह अक्षरं चेति यद्यपि विकारः प्रपंचाश्रयः तथापि अक्षरं न क्षरतीत्यक्षरं। च शब्दोऽवधारणे। अविना
श्येव ब्रह्म। मायात्मकत्वाद्विकारस्य विकाराश्रयत्वेऽप्यविनाश्येव कूटस्थं ब्रह्मावतिष्ठत इत्यभिप्रायः। मायात्मकत्वे च प्रपंचस्य
पूर्वमेव प्रपंचितं। तस्मात्सर्वात्मकत्वेऽपि ब्रह्मणः प्रपंचस्य मिथ्यात्मकत्वेन ब्रह्मणः प्रपंचासंसर्गित्वपूर्णानंदब्रह्मात्मानं पश्यतो मो २३
क्षाख्यः परमपुरुषार्थो भवतीत्यर्थः॥ ॥ ॥ ॥ ॥

कथं तर्ह्यात्मानं पश्यतो मोदासिद्धिरित्यत आह अंतेति अंत्रास्मिन्नन्नमयाद्यानंदमयांते देहविराडाद्यव्याकृतांते वा प्रपंचे शूर्ववू
र्वोपाधिप्रविलयेनोत्तरोत्तरमप्यशनायाद्यसंस्पृष्टं वाचामगोचरं ब्रह्म विदो विदित्वा लीना ब्रह्मणि विद्याद्युपसंहारमुखेन
लयं गता अहं ब्रह्मास्मीति ब्रह्मरूपेणैवावस्थिता इत्यर्थः। तत्पराः समाधिपराः। किं कुर्वन्ति योनिमुक्ता भवंति। गर्भजन्मजरा
तथा च ४ मरणसंसारभयान्मुक्ता भवंतीत्यर्थः। योगियाज्ञवल्क्यो ब्रह्मात्मनैवावस्थितं समाधिं दर्शयति यदृच्छेमिदमद्वैतमरूपं सर्वकार

अंतरं ब्रह्मविदो विदित्वा लीना ब्रह्मणि तत्परा योनिमुक्ताः ७।

णं आनंदममृतं नित्यं सर्वभूतेष्ववस्थितं। तदेवनान्यधीः प्राप्य परमात्मानमात्मना तस्मिन्प्रलीयते त्वात्मा समाधिः स
उदाहृतः। इंद्रियाणि वशीकृत्य यमादिगुणसंयुतः आत्ममध्ये मनः कुर्यादात्मानं परमात्मनि। परमात्मा स्वयंभूत्वा न किं
चिच्चिंतयेत्ततः तदा तु लीयते तस्मिन् प्रत्यगात्मन्यखण्डिते।। प्रत्यगात्मा स एव स्यादित्युक्तं ब्रह्मवादिभिरिति ७।।

श्वे० ३ भा० २४ नन्वद्वितीये परमात्मन्यभ्युपगम्यमाने जीवेश्वरयोरपि विभागाभावात् लीनात्ब्रह्मणि जीवानां ब्रह्मैकत्वपरलयश्रुतिर-
नुपपन्नैवेत्याशंक्य व्यवहारव्यवस्थायां जीवेश्वरयोरुपाधितो विभागं दर्शयित्वा तद्धितानादृत्य तत्त्वं दर्शयति संयुक्तमेत
दिति व्यक्तं विकारजातं अव्यक्तं कारणं तदुभयं क्षरमक्षरं च व्यक्तं क्षरं विनाशि अव्यक्तमक्षरमविनाशि तदुभयं परस्परसंयु
क्तं कार्यकारणात्मकं विश्वं भरते बिभर्ति ईशः ईश्वरः । तथा चाह भगवान् क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते उत्त
मः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः । यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वर इति न केवलमीश्वरो व्यक्ताव्यक्तं भरते अनी

संयुक्तमेतत् क्षरमक्षरं च व्यक्ताव्यक्तं भरते विश्वमीशः
अनीशश्चात्मा बध्यते भोक्तृभावाज्ज्ञात्वा देवं मुच्यते सर्वपाशैः ८

शश्चानीशश्च तत्रात्मा अविद्यातत्कार्यभूतदेहेन्द्रियादिभिर्बध्यते भोक्तृभावात् एतदुक्तं भवति परस्परसंसक्तव्यष्टिसम
ष्टिरूप ईश्वरः तद्व्यष्टिभूतदेहेन्द्रियात्मकोऽनीशो जीवः एवं समष्टिव्यष्ट्यात्मकत्वेन जीवपरयोरौपाधिकस्य भेदस्य विद्यमानत्वा
त्तदुपाध्युपासनद्वारेण निरुपाधिकमीश्वरं ज्ञात्वा मुच्यत इति भोक्त्रात्मैकत्ववादे नानुपपन्नं किंचिद्विद्यत इति । तथा चौपाधिक
मेव भेदं दर्शयति भगवान् याज्ञवल्क्यः आकाशमेकं हि यथा घटादिषु पृथग्भवेत् तथात्मैको ह्यनेकस्थो जलधारेष्विवांशुमान् ।
तथा च श्रीविष्णुधर्मे परमात्मात्मनोर्योऽयमभेदोऽपि विभागो हि न कल्पितः । क्षयेन तस्यात्मपरयोर्विभागाभाव एव हि आत्मा देवत्रसं १४

ज्ञोऽपि संयुक्तः प्राकृतैर्गुणैः तैरेव विगतः शुद्धः परमात्मा निगद्यते अनादिसम्बन्धवत्या क्षेत्रज्ञोऽयमविद्यया ॥ युक्तः पश्यति भेदेन ब्रह्म तत्त्वात्मनि सं-
स्थितम् तथा च श्रीविष्णुपुराणे विभेदजनके ज्ञाने नाशमात्यन्तिकं गते आत्मनो ब्रह्मणो भेदमसंतं कः करिष्यति तथा च वाशिष्ठे योगशास्त्रे
प्रश्नपूर्वकं दर्शितम् यद्यात्मा निर्गुणः शुद्धः सदानन्दोऽजरोऽमरः संसृतिः कस्य तात तस्मान्मोक्षो वाऽविद्यया विमोहितेन नाशे कथं तत्स्यं ज्ञायते भग-
वान् वदतः । यथावत् सर्वमेतन्मे वक्तुमर्हसि सत्तम वसिष्ठः तस्यैव नित्यशुद्धस्य सदानन्दमयात्मनः अवच्छिन्नस्य जीवस्य संसृतिः कीर्तिते
बुधैः एक एव हि भूतात्मा भूते भूते व्यवस्थितः एकधा बहुधा चैव दृश्यते जलचन्द्रवत् भ्रान्त्या रूढः स एवात्मा जीवसंज्ञः सदा भवेत् तथा च ब्रह्मपुरा-
णे परस्यैवौपाधिकं जीवादिभेदं दर्शयति कथं नैरौपाधिकभेदेन बन्धमुक्त्यादिव्यवस्थेत्याशङ्क्य दृष्टान्तपूर्वकं व्यवस्थां दर्शयति एकस्तु
सूर्यो बहुधा जलाधारेषु दृश्यते आभाति परमात्मा च सर्वोपाधिषु संस्थितः ब्रह्म सर्वशरीरेषु बाह्ये चाभ्यन्तरे स्थितम् आकाशमिव भूतेषु बुद्धा- धा
वात्मा न चान्यथा एवं सति यथा बुद्ध्या देहोऽहमिति मन्यते अनात्मन्यात्मता भ्रान्त्या सा स्यात् संसारबन्धिनी सर्वैर्विकल्पैर्हीनस्तु शुद्धो बुद्धोऽजरोऽमरः प्रशा-
न्तो व्योमवद्व्यापी चैतन्यात्मा सकृत्प्रभुः धूमाभ्रधूलिभिर्व्योम यथा न मलिनीयते प्राकृतैरपरामृष्टो विकारैः पुरुषस्तथा यथैकस्मिन् घटाकाशे रजोधूमादि-
भिर्युते नान्ये मलिनतां यान्ति दूरस्थाः कुत्रचित् क्वचित् यथा द्वन्द्वैरनेकैस्तु जीवे च मलिनीकृते एकस्मिन्नापरे जीवा मलिनाः सन्ति कुत्रचित् तथा च शुकशि-
क्षायोगेऽपास्तार्थः यथैकस्मिन् घटाकाशे रजोधूमादिभिर्युते न सर्वे सम्प्रयुज्यन्ते तद्वज्जीवाः सुखादिभिः तस्माद्द्वितीये परमात्मन्युपाधितो जीवेश्वरयो-
र्जीवानां च भेदव्यवस्थायाः सिद्धत्वात् विशुद्धसत्त्वोपाधेरीश्वरस्याविशुद्धोपाधिजीवगता सुखदुःखमोहादयो न तथा च भगवान् पराशरः ज्ञानात्मकस्या-
मलसत्त्वराशेरपेतदोषस्य सदा स्फुटस्य किं वा जगत्यत्र समस्तपुंसामज्ञातमस्यास्ति हृदि स्थितस्येति नापि जीवान्तरगतसुखदुःखमोहादिना जीवान्तर-
स्य बद्धस्य मुक्तस्य वा संबन्धः उपाधितो व्यवस्थायाः संभवात् अत एकमुक्तौ सर्वे मुक्तिरिति भवदुक्तस्य चोद्यस्यानवकाशः ८॥ ८ ॥

श्वे० २·१· आ० १

भा० १५ किञ्च स्वरूपं वैलक्षण्यमप्याह ज्ञाज्ञौ द्वाविति केवलं ज्ञाज्ञत्वक्रमत्ते ईशो नाव्यनीशः सन् बध्यते जीवोपि तु ज्ञाज्ञौ ईश्वरः ज्ञो जीवः तौ अजौ जा-
नादिरहितौ ब्रह्मण एवाविकृतस्य जीवेश्वरात्मनावस्थानात् । तथा च श्रुतिः पुरश्चक्रे द्विपदः पुरश्चक्रे चतुष्पदः पुरः स पक्षी भूत्वा पुरः पुरुष आवि-
शादिति एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्चेति च । ईशानीशौ ज्ञाज्ञत्वसंरूपत्वम् नन्वद्वैतवादिनो यदि भोक्तृभोग्यलक्षणप्रपञ्चासि-
अल्पज्ञ शक्तिमा द्धिः स्यात् तदा सर्वेशः परमेश्वरः अनीशो जीवः सर्वज्ञः परमेश्वरः असर्वज्ञो जीवः सर्वशक्तः परमेश्वरः देहादिविभ्रज्जीवः सर्वात्मा परमेश्वरः अ- सर्वज्ञ शक्तिमा
सर्वात्मा जीवः विश्वैश्वर्यं आप्तकामः परमेश्वरः अल्पैश्वर्यो नाप्तकामो जीवः सर्वतः पातोः स्वतन्त्रशीघो नियोगे सानामित्यादिना जीवे-
श्वरयोर्विलक्षणत्वव्यवहारसिद्धिः स्यात् न तद्भोक्त्रादिप्रपञ्चासिद्धिरस्ति स्वतः कुरुत्या परिणामत्वं ह्येतौ पक्ष्येवत्वं नो भोक्त्रादिरूपता भावा-

ज्ञाज्ञौ द्वावजावीशनीशावजा ह्येका भोक्तृभोग्यार्थयुक्ता अनन्तश्चात्मा विश्वरूपो ह्यकर्ता त्रयं यदा विन्दते ब्रह्ममेतत् ९॥

तत्रापि परतो ब्रह्मव्यतिरिक्तस्य भोक्त्रादिप्रपञ्चहेतुभूतस्य वस्त्वन्तरस्याभ्युपगमात् वस्त्वन्तरसद्भावे द्वैतमिति निरस्याशङ्क्याह अजा ह्येका भोक्तृ-
भोग्यार्थयुक्तेति । भवेदयमीश्वरानीश्वरविभागः यदि प्रपञ्चासिद्धिर्न स्यात् सिद्ध्येव प्रपञ्चः हि यस्मादेषा यस्मादजा प्रकृतिर्न जायत इत्यादिना
सिद्धा प्रतत्व धर्मिणीति अजामेकाम् । मायां तु प्रकृतिं विद्यात् इन्द्रो मायाभिः पुरुरूप ईयते मायां वरा प्रकृतिः संभवाम्यात्ममायया इत्यादि श्रु-
तिस्मृतिसिद्धा विश्वजननी देवात्मशक्तिरूपैका सा विकारभूतभोक्तृभोगभोग्यार्थप्रयुक्ता इत्यनिकटवर्तिनी किं कुर्वाणा वर्तिष्ठते । तस्मात्
सोपि मायी परमेश्वरो मायोपाधिसन्निधेस्तद्वानिव कार्यभूतैर्देहादिभिस्तद्वदेव विभक्त एवांशविभक्त ईश्वरादिरूपेणावतिष्ठते तस्मादेकस्मि-
न्नेकरसे परमेश्वरे नामाभ्युपगमानेऽपि जीवेश्वरादि सर्वलौकिकवैदिकसर्वभेदव्यवहारसिद्धिः न तत्त्वतोऽद्वैतवस्त्वन्तरसद्भावाद्द्वैतवादिप्रसक्तिः मायाया
या अनिर्वाच्यत्वेन वस्तुत्वायोगात् तथाह एषा हि भगवन्माया सदसद्व्यक्तिवर्जितेति यस्मादजे वा भोक्त्रादिरूपा तस्मात् न तत्त्वोक्तत्वमि २५

श्वेताश्वतर [illegible]

अनन्तश्चात्मा चशब्दो व्याख्यातो अनन्तएवात्मा अस्यान्तः परिच्छेदो देशतः कालतो वस्तुतो वापि न विद्यत इति। विश्वरूपो विश्वमस्यैव रूपमि
ति वा तस्माद्विश्वरूपत्वात्। वाचारम्भणो विकारो नामधेयमिति रूपस्य रूपिव्यतिरेकेणाभावात् विश्वरूपत्वादप्यानन्त्यं सिद्धमित्यर्थः। हि
शब्दो यस्मादर्थे यस्माद्विश्वरूपो वैरूप्यलक्षणः परमात्मा इत्येवमादिभिरात्मनो विश्वरूपत्वमित्यर्थः। यत एवानन्तो विश्वरूपश्चात्मा अ
त एव अकर्त्ता कर्तृत्वादिसंसारधर्मरहित इत्यर्थः। यदैवमनन्तो विश्वरूपः कर्तृत्वादिसकलसंसारधर्मवर्जितो मुक्तः पूर्णानन्दा
द्वितीयब्रह्मरूपेणैवावतिष्ठत इत्याह। त्रयं यदा विन्दते ब्रह्ममेतदिति त्रयं भोक्तृभोगभोग्यरूपम् मायात्मकत्वादधिष्ठानभूतव्यतिरेके
णानिरूपणान्निर्विकल्पविकल्पपूर्णानन्दाद्वितीयब्रह्मभावः, कर्तृत्वादिसकलसंसारधर्मवर्जितो वीतशोकः कृतकृत्योऽवतिष्ठत इत्य
र्थः। अथवा त्रयाज्ञात्मकजीवेश्वरप्रकृतिरूपत्रयं ब्रह्म यदा विन्दते लभते तदा मुच्यत इति। ब्रह्ममिति मकारान्तम्। ब्रह्ममेतु मां मधु
मेतु माम्॥ मामिति छान्दसम् जीवेश्वरयोर्विभागं दर्शयित्वा तद्विज्ञानादमृतत्वं दर्शितं भवति ९॥ विभागज्ञाना

श्वे॰ उ॰ भा० १६ इदानीं प्रधानेश्वरयोर्वैलक्षण्यं दर्शयित्वा तद्विज्ञानादमृतत्वं दर्शयति। क्षरं प्रधानममृताक्षरं हर इति अविद्यादेर्हरणात् परमेश्वरो हरः। अ
मृतञ्च तदक्षरञ्चेत्यमृताक्षरममृतत्वभोक्तेव ईश्वर इत्यर्थः। स ईश्वरः क्षरात्मानौ प्रधानपुरुषावीशते ईष्टे देव एकः कश्चित् सदानन्दोऽद्वितीयः पर
मात्मा तस्य परमात्मनोऽभिध्यानात् कथं योजनात् जीवानां परमात्मनः संयोजनात् तत्त्वभावादहं ब्रह्मास्मीति भूयश्चासकृत् यद्वा स्वात्मा
र्थज्ञाननिष्पत्तिरन्ते स्वात्मनि चार्थज्ञानोदयवेलायां विश्वमायानिवृत्तिः सुखदुःखमोहात्मकाशेषप्रपञ्चरूपमायानिवृत्तिः १० ॥ २

क्षरं प्रधानममृताक्षरं हरः क्षरात्मनावीशते देव एकः तस्याभिध्यानाद्योजनात् तत्त्वभावाद् भूयश्चान्ते विश्वमा
यानिवृत्तिः १० ज्ञात्वा देवं सर्वपाशापहानिः क्षीणैः क्लेशैर्जन्ममृत्युप्रहाणिः॥

इदानीं तद्विदस्तदभिध्यानात् स्वात्मज्ञानध्यानफलं फलमेवं दर्शयति ज्ञात्वा देवमयमहमस्मीति सर्वपाशापहानिः। पाशरूपाणां सर्वेषाम
विद्यादीनामपहानिः क्षीणैरविद्यादिभिः क्लेशैस्तत्कार्यभूतजन्ममृत्युप्रहाणिः जननमरणादिदुःखहेतुविनाशफलं प्रदर्शितम्॥

ध्याने किंचित् क्रममुक्तिरूपं विशेषमाह तस्येति तस्य परमेश्वरस्याभिध्यानाद् देहभेदे शरीरभेदे पायोत्तरकालमर्चि
रादिना देवयानपथा गता परमेश्वरसायुज्यं गतस्य तृतीयं विराड्रूपापेक्षया अव्याकृतपरमव्योमकारणेश्वरावस्थं विश्वैश्वर्य
लक्षणं भवति । स तत्रैव निर्विशेषमात्मानं ज्ञात्वा केवलो निरस्तसमस्तैश्वर्यं तदुपाधिसिद्धिरव्याकृतपरमव्योमकारणेश्वरात्म
कं तृतीयावस्थं विश्वैश्वर्यं हित्वा आप्तकाम आत्मकामः पूर्णानंदाद्वितीयब्रह्मरूपोऽवतिष्ठते । एतदुक्तं भवति सम्यग्दर्शन
स्य तथाभूतवस्तुविषयत्वेन निर्विषयपूर्णानंदाद्वितीयब्रह्मविषयत्वात् विज्ञानानंतरमविद्यातत्कार्यप्रहाणेन पूर्णानंदाद्वितीय
यब्रह्मस्वरूपोऽवतिष्ठते । ध्यानस्य पुनः महिमा न निराकारे बुद्धिप्रवर्तत इति सविशेषब्रह्मविषयत्वात् तद्यथ यथोपासते इ
ति न्यायेन सविशेषविश्वैश्वर्यलक्षणब्रह्मप्राप्त्या विश्वैश्वर्यमनुभूय निर्विशेषपूर्णानंदब्रह्मात्मानं ज्ञात्वा केवलात्मकामो वाऽऽ
प्तशेषपुमर्थो मुक्तो भवति तथा शिवधर्मोत्तरे ज्ञानध्यानयोर्विश्वैश्वर्यलक्षणं केवलात्माप्तकामलक्षणं च फलं दर्शयति ध्या
॥ ॥ तस्याऽभिध्यानात् तृतीयं देहभेदे विश्वैश्वर्यं केवल आप्तकामः ॥११॥
नादैश्वर्यमतुलमैश्वर्यात्सुखमुत्तमं ज्ञानेन तत्परित्यज्य विदेहो मुक्तिमाप्नुयादिति १ तथा च दहरादिसविशेषसगुणोपा
सकानां स यदि पितृलोककामो भवति संकल्पादेवास्य पितरः समुत्तिष्ठंतीत्यादिना विश्वैश्वर्यलक्षणं फलं दर्शयति तथा च प्रश्नो
पनिषदि यः पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण परमपुरुषमभिध्यायीत स तेजसि सूर्ये संपन्न इत्यादिना परमपुरुषमभि
ध्यायतोऽर्चिरादिमार्गोपदेशपूर्वकं स एतस्माज्जीवघनात्परात्परं पुरिशयं पुरुषमीक्षत इति ब्रह्मलोकं गतस्य तत्रैव सम्य
ग्दर्शनलाभं दर्शयित्वा तमोंकारेणैवायतनेनान्वेति विद्वान् यत्तच्छांतमजरममृतमभयं परं चेतीति सम्यग्दर्शनेन मोक्षोपदि
ष्टः तमेवं विद्वानमृत इह भवतीति विदुषोऽर्चिरादिगमनं विना इहैवामृतत्वप्राप्तिं दर्शयति अथाकामयमान इत्यारभ्य न त
स्य प्राणा उत्क्रामंति ब्रह्मैव सन् ब्रह्माप्येतीत्यादिना विनैवोत्क्रांतिं विदुषो मोक्ष उपदिष्टः । उदस्मात् प्राणाः क्रामंत्याहो नेति नेति हो
वाच याज्ञवल्क्य इति प्रश्नपूर्वकमुत्क्रान्त्यभावो दर्शितः तथा च ब्राह्मे पुराणे जीवन्मुक्तिं गत्यभावं दर्शयति । यस्मिन्काले स्व

श्वे०
भा०
२७

आत्मानं योगी जानाति केवलं। तस्मात्कालात्समारभ्य जीवन्मुक्तो भवेदसौ।१। मोक्षस्य नैव किंचित्स्यादन्यत्र गमनं क्वचित्। स्था
नं पराख्यमपरं यत्र गच्छन्ति योगिनः।२। अज्ञानबंधभेदस्तु मोक्षो ब्रह्मलयस्त्विति। तथा लैङ्गे। विदुषो जीवन्मुक्तिं दर्शयति।३। इह
क॥१ लोके परे चैव कर्तव्यं नास्ति तस्य वै। जीवन्मुक्तो यतस्तस्मात् ब्रह्मवित् परमार्थतः।४। शिवधर्मोत्तरे गाज्ञात्पर्यापि कर्तव्यं किंचिदस्य
न विद्यते। इहैव स विमुक्तः स्यात् संपूर्णः समदर्शनः।१। तस्मादुपासको देहाद्दुर्लभ्याऽर्चिरादिना देवयानेन विश्वेश्वर्य्यं ब्रह्मप्राप्य
विश्वेश्वर्य्यमनुभूय तत्रैव केवलं प्रत्यस्तमितभेदं पूर्णानंदाद्वितीयब्रह्मात्मानं ज्ञात्वा केवलमात्मकामो मुक्तो भवतीति विरुद्धं। निर्विशे
षपूर्णानंदाद्वितीयब्रह्मविज्ञानाद्दूषगंतृगंतव्यगमनादिभेदप्रत्यस्तमयाद्धि नैवोत्क्रान्तिर्देवयानं ब्रह्मज्ञानसमनंतरं जीवन्मुक्तो
ब्रह्मज्ञानसमनंतरं ब्रह्मानंदमनुभूयात्मरतिरात्मतृप्त आत्मन्येवांतःसुखोऽन्तरारामोऽन्तर्ज्योतिरात्मक्रीड आत्मरतिरात्मनि पुन
आत्मानंद इहैव स्वाराज्ये भूम्नि स्वे महिम्न्यमृतोऽवतिष्ठते तद्धेतुता सर्वविषयपरित्यागेन ब्रह्मण्येव धाय वाङ्मनःकायमनिष्याद्यं
॥ एतज्ज्ञेयं नित्यमेवात्मसंस्थं नातःपरं वेदितव्यं हि किंचित्। भोक्ता भोग्यं प्रेरितारं च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्म एतत्।१२।

श्रौतस्मार्तलक्षणं कर्म कृत्वा विशुद्धसत्वो योगारूढो भूत्वा शमादिसाधनसंपन्नः। योगी युंजीत सततमात्मानं रहसि स्थितः। एका
की यतचित्तात्मा निराशीरपरिग्रहः। युंजन्नेवं सदात्मानं योगी विगतकल्मषः। सुखेन ब्रह्मसंस्पर्शमत्यन्तं सुखमश्नुते। सर्वभूत
स्थमात्मानं सर्वभूतानि चात्मनि। ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः। समं पश्यन् हि सर्वत्र समवस्थितमीश्वरं। न हि न
स्त्यात्मनात्मानं ततो याति परां गतिं।१४। यस्माज्ज्ञानानंतरं परमपुरुषार्थसिद्धिः तस्मात् एतज्ज्ञेयमिति एतत्प्रकृतं केवलात्मा
ऽऽकाशब्रह्मरूपं नित्यं नियमेन ज्ञेयं किमन्यत्संस्थं न स्वात्मसंस्थं ज्ञेयं नानात्मनि। ब्राह्मे श्रूयते तमात्मस्थं येऽनुपश्यन्ति धी
रास्तेषां शांतिः शाश्वती नेतरेषामिति। तथा च शिवधर्मोत्तरे योगिनामात्मनिस्थितः। शिवमात्मनि पश्यंति प्रतिमासु न यो
गिनः।१। आत्मस्थं यः परित्यज्य बहिस्थं यजते शिवं। हस्तस्थं पिंडमुत्सृज्य लिह्यात्कूर्परमात्मनः।२। सर्वत्रावस्थितं शांतं न पश्यं
तीहपोवरं ज्ञानचक्षुर्विहीनत्वादंधः सूर्यं यथोदितं।३। यत्र पश्येत्सर्वगं शांतं तस्याध्यात्मस्थितः शिवः। आत्मस्थं ये न पश्यं २७

तितीर्थमागतिते शिवं ।८। आत्मस्थं तीर्थमुत्सृज्य बहिस्तीर्थादियो व्रजेत् । करस्थं स महारत्नं त्यक्त्वा काचं विमार्गति ।।१।। अथवा
एतत् यदपरोक्षं प्रत्यगात्मरूपं तन्नित्यमविनाशि स्वमहिम्नि स्थितं ब्रह्म वेदितव्यं । कस्मात् हि यत्र उदेयस्मादर्थे तस्मान्नातः परं
वेदितव्यमस्ति किंचिदपि । श्रूयते च बृहदारण्यके । तदेतत् पदनीयमस्य सर्वस्य यदयमात्मेति । कथमेतज्ज्ञेयमित्याह भो
क्ता जीवो भोग्यमितरत् । सर्वं प्रेरितारं च मत्वा मीत्यपरमेश्वरः तदेतत् त्रिविधं प्रोक्तं ब्रह्मैवेति । भोक्ताद्यशेषभेदप्रपंचविला
पनेनैव निर्विशेषं ब्रह्मात्मानं जानीयादित्यर्थः । तथा चोक्तं भगवद्गीतायां त्यक्त्वा सर्वविकल्पांश्च स्वात्मस्थं निश्चलं म
नः । कृत्वा शान्तो भवेद्योगी दग्धेंधन इवानलः ।।१।। तथा च श्रीविष्णुपुराणे तस्यैव कल्पनाहीनस्वरूपग्रहणं हि यत् । मन
सा ध्याननिष्पाद्यः समाधिः सोऽभिधीयते इति तदानीमोमित्येतेनाक्षरेण परं पुरुषमभिध्यायीत । ओमित्यात्मानं युञ्जीत ।
ओमित्यात्मानं ध्यायीतेति श्रुतेः ।१२। आत्मानमविद्यापराभिध्यानेन प्रणवस्य नित्यमाभिध्यानोंगतेन प्रणवं दर्शयति व
।। वह्नेर्यथा योनिगतस्य मूर्तिर्न दृश्यते नैव च लिङ्गनाशः । स भूय एवेन्धनयोनिगृह्यस्तद्वोभयं वै प्रणवेन देहे ।१३।
स्वदेहमरणिं कृत्वा प्रणवं चोत्तरारणिं । ध्याननिर्मथनाभ्यासाद्देवं पश्येन्निगूढवत् ।१४। तिलेषु तैलं दधिनीव सर्पिरापः स्रोतःस्वरणीषु चाग्निः । एवमात्मात्मनि गृह्यतेऽसौ ।
त्तरारणिगत स्या । १ ।
दृश्येति । वह्नेर्यथा योनिगतस्य मूर्तिः स्वरूपं न दृश्यते मथनात्प्राक् । नैव च लिंगस्य सूक्ष्मदेहस्य विनाशः स एवाऽरणिग
तोऽग्निर्भूयः पुनः पुनरिंधनयोनिना मथनेन गृह्यः । योनिशब्दोऽत्र कारणवचनः इंधनेन कारणेन पुनः पुनर्मथनाद्गृह्य
तद्वोभयं वा प्राक् द्वैकार्थौ ।। तद्वोभयं तद्वदुभयमिव मथनात्प्राक् न गृह्यते मथनेन च गृह्यते । तद्वदात्मा वह्निस्थानीयः प्रणवेनो
त्तरारणिस्थानीयेन मथनान्गृह्यते देहे अधरारणिस्थानीये ।१३। तदेव प्रपंचयति स्वदेहेति स्वदेहमरणिं कृत्वा अधरारणिं
ध्यानेन निर्मथनं तस्य निर्मथनस्याभ्यासाद्देवं ज्योतीरूपं पश्येन्निगूढाग्निवत् ।१४। उक्तार्थस्य दृढिम्ने दृष्टान्तान् बहून्द
र्शयति तिलेष्विति तिलेषु यंत्रपीडनेन तैलं गृह्यते दधि मथनेन सर्पिरिव । आपः स्रोतःसु शुष्कासु नदीषु भूखननेन । अरणीषु
चाग्निर्मथनेन । एवमात्माऽऽत्मनि स्वात्मनि गृह्यते । असौ मननात्मभूतदेहादिषु यन्नमयाद्यध्यासोपाधिप्रविलापनेन निर्वि
शेषपूर्णानंदस्वात्मन्येवावगम्यत इत्यर्थः । ।। ।। ।। ।। ।।

केनतर्हि पुरुषेणासौ आत्मन्येव गृह्यत इत्यत आह सत्येनेति सत्येन यथा भूतहितार्थवचनेन भूतहितेन। सत्यं भूतहितं प्रोक्तमि
तिस्मरणात्। तपसा इंद्रियमनसामैकाग्र्यलक्षणेन। मनसश्चेंद्रियाणां चैकाग्र्यं परमं तप इति स्मरणात्। एनमात्मानं योऽनुपश्य
ति।१५। कथमेनमनुपश्यतीत्यत आह सर्वव्यापीति सर्वं प्रकृत्यादिविशेषांतं व्याप्यावस्थितं न देहेंद्रियाद्यध्यात्ममात्रावस्थित
मात्मानं क्षीरे सर्पिरिव सारत्वेन निरंतरतया आत्मत्वेन सर्वत्रार्पितमात्मविद्यातपसोर्मूलं कारणं। श्रूयते च एष ह्येव साधु कर्म का
रयति। इदानीं बुद्धियोगं तं येन मामुपयांति त इति। अथवा आत्मविद्या च तपश्च यस्यात्मलाभे मूलहेतुरिति। तथा च श्रुतिः वि
द्ययाऽमृतमश्नुते। विद्ययामृतं। तपसा ब्रह्म विजिज्ञासस्वेति च। ब्रह्मोपनिषत्परं उपनिषत्समस्तेन परं श्रेय इति। यः सत्यादि
साधनसंयुक्त एनं सर्वव्यापिनमात्मानं क्षीरे सर्पिरिवार्पितं आत्मविद्यातपोमूलं तद्ब्रह्मोपनिषत्परं अनुपश्यति चैनं सर्वगतब्र
ह्मात्मदर्शिनामात्मन्येव गृह्यते। नासत्यादियुक्तेनापरिछिन्नब्रह्मात्ममयाद्यात्मना। श्रूयते च सत्येन लभ्यस्तपसा ह्येष आत्मा

सत्येनैनं तपसा योऽनुपश्यति।१५। सर्वव्यापिनमात्मानं क्षीरे सर्पिरिवार्पितं। आत्मविद्यातपोमूलं तद्ब्रह्मोपनि
षत्परं तद्ब्रह्मोपनिषत्परमिति।१६। इति श्वेताश्वतरोपनिषत्सु प्रथमोऽध्यायः।१। ओं। युंजानः प्रथमं
मनस्तत्त्वाय सविता धियः। अग्नेर्ज्योतिर्निचाय्य पृथिव्या अध्याभरत्॥१॥ ॥ ॥ ॥

सम्यग्ज्ञानेन ब्रह्मचर्येण नित्यं। न येषु जिह्ममनृतं न माया चेति। द्विर्वचनमध्यायपरिसमाप्त्यर्थं।१६। इति श्रीमद्गोविंदभग
वत्पूज्यपादशिष्यपरमहंसपरिव्राजकाचार्यश्रीमच्छंकरभगवत्प्रणीते श्वेताश्वतरोपनिषद्भाष्ये प्रथमोऽध्यायः।१। हरिः ओं॥
ध्यानमुक्तं ध्याननिर्मथनाभ्यासाद्देवं पश्येन्निगूढवदिति परमात्मदर्शनोपायत्वेन इदानीं तदपेक्षितसाधनविधानार्थं द्वि
तीयोऽध्याय आरभ्यते। तत्र प्रथमं तावत्सिद्ध्यर्थं सवितारमाशास्ते युंजान इति युंजानः प्रथमं मनः प्रथमं ध्यानारंभे मनः
परमात्मनि संयोजनया धियः इतराणि प्राणान्। प्राणा वै धिय इति श्रुतेः। अथवा धियः बाह्यविषयज्ञानानि। किमर्थं तत्त्वाय
तत्त्वमहणाय सविता धियो बाह्यविषयज्ञानाद् अग्नेस्तस्य ज्योतिः प्रकाशं निचाय्य दृष्ट्वा पृथिव्या अध्याभरत् शरीरे आभरत्
आहरत् एतदुक्तं भवति ज्ञाने प्रवृत्तस्य मम बाह्यविषयज्ञानादुपसंहृत्य परमात्मन्येव संयोजयितुमनुग्राहकदेवतात्मनः सत्यादीनां

युक्तेनेति। यदा तस्यायमनो योजयमनेनुग्राहकं प्रशस्तध्यानेन देहेंद्रियदार्ढ्यं करोति तदा युक्तेन सवित्रा परमात्मनि संयोजितेन मनसा वयं तस्य देवस्य सवितुः सवेऽनुज्ञायां सत्यां सुवर्गेयाय स्वर्गप्राप्तिहेतुभूताय ध्यानकर्मणे यथासामर्थ्यं प्रयतामहे परमात्मवचनोऽत्र स्वर्गशब्दः तत्प्रकरणात् तस्यैव सुखरूपत्वात् तदप्राप्तावितरस्य सुखस्य। तथा च श्रुतिः एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवंतीति। २। युक्त्वायेति। पुनरपि सोऽप्येवं करोत्विति प्रार्थना युक्त्वाय योजयित्वा देवान् मनआदीनि करणानि तेषां विशेषणं स्वः स्वर्गसुखं पूर्णानंदं ब्रह्म यत इति द्वितीया बहुवचनं। नः पूर्णानंदब्रह्म गच्छतो न शब्दादिविषयान् पुनरपि विशेषणांतरं धिया सम्यग्दर्शनेन दिवं द्योतनस्वभावचैतन्यैकरसं बृहन् महद् ब्रह्म ज्योतिः प्रकाशं करिष्यतः पूर्णानंदब्रह्माविष्करिष्यतः अत्र द्वितीया बहुवचनं। सविता प्रसुवाति तान् तानि करणानि। यथा करणानि विषयेभ्यो निवृत्तानि आत्माभिमु

युक्तेन मनसा वयं देवस्य सवितुः सवे। सुवर्गेयाय शक्त्या। २। युक्त्वाय मनसा देवान् सुवर्यतो धिया दिवं। बृहज्ज्योतिः करिष्यतः स
विता प्रसुवाति तान्। ३। युंजते मन उत युंजते धियो विप्रा विप्रस्य बृहतो विपश्चितः। वि होत्रा दधे वयुनाविदेक इन्मही देवस्य
सवितुः परिष्टुतिः। ४। युजे वां ब्रह्म पूर्व्यं नमोभिर्वि श्लोका यंति पथ्येव सूराः। शृण्वंतु विश्वे अमृतस्य पुत्रा आ ये धामानि दिव्या

खानि आत्मप्रकाशमेव तथाऽनुजानातु सवितेत्यर्थः। ३। तस्यैवमनुजानतो महता परितुष्टिः कर्तव्येत्याह युंजत इति युंजते योजयंति ये विप्रा मन उत युंजते धियः इतराण्यपि करणानि। धीहेतुत्वात् करणेषु धीशब्दप्रयोगः तथा च श्रुत्यंतरं। यदा पंचावतिष्ठंते ज्ञानानि मनसा सहेति। विप्रस्य विशेषणं अमृतस्य बृहतो महतो विपश्चितः सर्वज्ञस्य देवस्य सवितुर्मही महती परिष्टुतिः कर्तव्या। कैर्विप्रैः। पुनरपि विशिनष्टि। वि होत्रा दधे। होत्राः क्रिया यो विदधे वयुनावित् प्रज्ञावित् सर्वज्ञानात् साक्षिभूत एकोऽद्वितीयः। ये विप्रा मनआदिकरणानि विषयेभ्य उपसंहृत्यात्मन्येव योजयंति तैर्विप्रस्य बृहतो विपश्चितो महती परिष्टुतिः कर्तव्या होत्रा दधे वयुनाविदेकः सविता। ४। किं चा युजे वामिति। युजे वां समादधे वां युवयोः करणानुग्राहकयोः संबंधि प्रकाश्यत्वेन तत्प्रकाशितं ब्रह्मेत्यर्थः। अथवा वामिति बहुवचनार्थे युष्माकं कारणभूतं ब्रह्म पूर्व्यं पूर्वैश्चिरंतनं युजे समादधे। नमोभिर्नमस्कारैश्चित्तप्रणिधानादिभिः। एवमेवं समादधानस्य मम श्लोका यंति कीर्त्तितव्यायंति विविधमेत्य पथ्येव सूराः। पथि सन्मार्गे। अथवा पथ्या कीर्तिरित्येतदुक्तं प्रार्थनारूपं शृण्वंतु

श्वे० युंजानः प्रथमं मन इत्यादिना सवित्रादिप्रार्थनाप्रतिपादिता यस्तु पुनः प्रार्थनां कृत्वा तैरनुज्ञातः सन् योगे प्रवर्तते स भोगहेतोः श्व०२
भा० कर्मण्येव प्रवर्तत इत्याह अग्निर्यत्रेति। अग्निर्यत्राभिमथ्यते अरण्योर्मथनं तत्साधनादौ। वायुर्यत्र प्रवर्ग्यादौ। पवित्रप्रेरितः
२९ प्रादुर्भूतमभिव्यक्तं करोति। सोमो यत्र दशापवित्रात् पूर्व्यमानोऽतिरिच्यते तत्र कृतौ संजायते मनः। यस्मादननुज्ञातस्य तस्य भोगहे
तोः कर्मण्येव प्रवृत्तिः तस्मात्। ६। सवित्रेति। सवित्रा प्रसवेन सवितृप्रसवेनेति यावत्। जुषेत सेवेत ब्रह्म पूर्व्यं चिरंतनं। तस्मिन् ब्रह्म
णि योनिष्ठां समाधिलक्षणां कृणवसे कुरुष्व। एवं कुर्वतो मम किं ततो भवतीत्याह नहीति। न हि ते पूर्वं स्मार्तं कर्म इष्टं श्रौतं च
कर्म आक्षिपत् न पुनर्भोगहेतोर्बध्नाति ज्ञानाग्निना सबीजस्य दग्धत्वात्। उक्तं च यथैषीकातूलमग्नौ प्रोतं प्रदूयेत एवं हास्य सर्वे
पाप्मानः प्रदूयंत इति। ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुतेऽर्जुनेति चेति। अग्निर्यत्राभिमथ्यत इत्यत्रापरव्याख्या। अग्निः परमा

अग्निर्यत्राभिमथ्यते वायुर्यत्राभियुज्यते। सोमो यत्रातिरिच्यते तत्र संजायते मनः। ६। सवित्रा प्रसवेन जु
षेत ब्रह्म पूर्व्यं॥ तत्र योनिं कृणवसे न हि ते पूर्तमक्षिपत्॥ ७ ॥ ॥ ॥ ॥ ॥

त्मा अविद्यातत्कार्यस्य दाहकत्वात्। उक्तं च अहमज्ञानजं तमः। नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वतेति। यत्र यस्मिन् पुरु
षे मथ्यते स्वदेहमरणिं कृत्वेत्यादिना। पूर्वोक्तध्याननिर्मथनेन वायुर्यत्राऽभियुज्यते प्रादुर्भूतमभिव्यक्तं करोति रेचकादिकरणात्।
सोमो यत्रातिरिच्यतेऽनेकजन्मसेवया तत्र तस्मिन् यज्ञदानतपःप्राणायामसमाधिविशुद्धांतःकरणे संजाते परिपूर्णानंदाद्वैती
यब्रह्माकारं समुत्पद्यते नान्यथाऽशुद्धांतःकरणे उक्तं च प्राणायामविशुद्धात्मा यस्मात्पश्यति तत्परं तस्मान्नातः परं किंचित्
प्राणायामादिति श्रुतिः। १। अनेकजन्मसंसारचिते पापसमुच्चये। नाक्षीणे जायते पुंसां गोविंदाभिमुखी मतिः। १। जन्मांतर
सहस्रेषु तपोज्ञानसमाधिभिः नराणां क्षीणपापानां कृष्णे भक्तिः प्रजायते। २। तस्मात् प्रथमं यज्ञाद्यनुष्ठानं ततः प्राणायामा
दि ततः समाधिः ततो वाक्यार्थज्ञाननिष्पत्तिः ततः कृतकृत्यतेति॥ ६। ७॥ श्रीकृष्णावासुदेवाय नमो नमः॥ ६ ॥ ७ ॥ २९

तत्र योनिं कृत्वेति से इत्युक्तं कथं योनिकारणमित्याशंक्य तत्प्रकारं दर्शयति त्रिरुन्नतमिति त्रीण्युन्नतानि उरोग्रीवशिरांसि उन्नता
नि यस्मिन् शरीरे त्रिरुन्नतं संस्थाप्य समं शरीरं हृदींद्रियाणि मनश्चक्षुरादीनि मनसा संनिवेश्य संनियम्य ब्रह्मैवोडुपस्तरणसाध
नं तेन ब्रह्मोडुपेन ब्रह्मशब्दं प्रणवं वर्णयंति तेनोडुपस्थानीयेन प्रणवेन काकादिवद्भयत्रसंबध्यते तेनोपसंहृत्य तेन प्रतरेत् अति
क्रमेत् विद्वान् ब्रह्मस्रोतांसि संसारसरितः स्वाभाविक्यविद्याकामकर्मप्रवर्तितानि भयावहानि प्रेततिर्यगूर्ध्वप्राप्तिकराणि पुनरावृ
त त्ति भांजि प्राणायामतापि मनोमलस्य चित्तं ब्रह्मणि स्थितं भवतीति प्राणायामो निर्दिश्यते प्रथमं नाडिशोधनं कर्तव्यं ततः प्रा
णायामेऽधिकारः दक्षिणनासिकापुटमंगुल्याऽवष्टभ्य वामेन वायुं पूरयेद् यथाशक्ति ततोऽनंतरमुत्सृज्यैव दक्षिणेन पुटे
न समुत्सृजेत् सव्यमपि धारयेत् पुनर्दक्षिणेन पूरयित्वा सव्येन समुत्सृजेद् यथाशक्ति त्रिःपंचकृत्वा वैवमभ्यस्यतः सवनच
तुष्टयमपररात्रे मध्याह्ने पूर्वरात्रेऽर्धरात्रे च पक्षान्मासाद्विशुद्धिर्भवति त्रिविधः प्राणायामो रेचकः पूरकः कुंभक इति तदेवाह

[illegible] त्रिरुन्नतं स्थाप्य समं शरीरं हृदींद्रियाणि मनसा संनिवेश्य ॥ ॥
ब्रह्मोडुपेन प्रतरेत विद्वान् स्रोतांसि सर्वाणि भयावहानि ॥ ८ ॥

इष्टितानि समभ्यस्य वांछितानि यथाविधि प्राणायामततो मार्गं जितासनगतोऽभ्यसेत् ।१। मृद्वासने कुशान् सम्यगास्तीर्या
जिनमेव च । लंबोदरं च संपूज्य फलमोदकभक्षणैः ।२। तदासने सुखासीनः सव्ये न्यस्येतरं करं । समग्रीवशिराः सम्यक् संवृतास्यः सु
निश्चलः ।३। प्राङ्मुखोदङ्मुखो वापि नासाग्रन्यस्तलोचनः । अतिभुक्तमभुक्तं च वर्जयित्वा प्रयत्नतः ।४। नाडीसंशोधनं कुर्यादु
क्तमार्गेण प्रयत्नतः । वृथा क्लेशो भवेत्तस्य तच्छोधनमकुर्वतः ।५। नासाग्रे शशभृद्बीजं चंद्रातपवितानितं । सप्तमस्य तु वर्गस्य च
तुर्थं बिंदुसंयुतं ।६। विश्वमध्यस्थमालोक्य नासाग्रे चक्षुषी उभे । इडया पूरयेद्वायुं बाह्यं द्वादशमात्रकैः ।७। ततोऽग्निं पूर्ववद्ध्या
येत् स्फुरज्ज्वालावलीयुतं । रवषष्ठं बिंदुसंयुक्तं शिखिमंडलसंस्थितं ।८। ध्यायेद्विरेचयेद्वायुं मंदं पिंगलया पुनः । पुनः पिंग
लयापूर्य घ्राणं दक्षिणतः सुधीः ।९। तद्वद्विरेचयेद्वायुमिडया तु शनैः शनैः । त्रिचतुर्वत्सरं चापि त्रिचतुर्मासमेव वा ।१०॥

श्वे० भा० २०

श्वे२

गुरूणा प्रकारेण रहस्येव समभ्यसेत्। प्रातर्मध्यंदिने सायं स्नात्वा षट्कृत्व आचरेत्॥११॥ संध्यादिकर्म कृत्वैवं मध्यरात्रेऽपि
नित्यशः। नाडीशुद्धिमवाप्नोति तच्चिह्नं दृश्यते पृथक्॥१२॥ शरीरलघुता दीप्तिर्जठराग्निविवर्धनं। नादाभिव्यक्तिरित्येतल्लिं
गं तच्छुद्धिसूचनं॥१३॥ शुद्धं तेनः जपैस्तोनः स्पर्शशुद्धेरहेतवः। प्राणायामं ततः कुर्याद्रेचपूरककुंभकैः॥१४॥ प्राणापानसमा
योगः प्राणायामः प्रकीर्तितः। प्रणव आत्मकं गार्गि रेचपूरककुंभकं॥१५॥ तदेतत् प्रणवं विद्धि तत्स्वरूपं ब्रवीम्यहं। यद्वदादौ स
रः प्रोक्तो वेदांते षु प्रतिष्ठितः॥१६॥ तयोरंतं तु यद्भागि विर्गपंचकपंचमं। रेचकं प्रथमं विद्धि द्वितीयं पूरकं विदुः॥१७॥ तृतीयं कुंभकं
प्रोक्तं प्राणायामस्त्रिरात्मकः। त्रयाणां कारणं ब्रह्म भास्वरं सर्वकारणं॥१८॥ रेचकः कुंभको गार्गि संहारस्थित्यात्मकावुभौ। कुंभक
स्तथ संहारः कारणं योगिनामिह॥१९॥ पूरयेत् षोडशैर्मात्रैरापादतलमस्तकं। मात्रैर्द्वात्रिंशकैः पश्चाद्रेचयेत्सुसमाहितः॥२०॥

॥ प्राणान्संपीड्येह संयुक्तचेष्टः क्षीणे प्राणे नासिकयोच्छ्वसीत॥ दुष्टाश्व
युक्तमिव वाहमेनं विद्वान्मनो धारयेताप्रमत्तः॥ ॥९॥ ॥

संपूर्णकुंभवद्वायुमं यथा मूर्ध्नि दिशातः। कुंभकं धारणं गार्गि चतुःषष्ट्यातु मात्रया॥२१॥ ऋषयस्तु वदंत्यन्ये प्राणायामपरायणाः
पवित्रभूताः पूतात्माः प्रभंजनजयेरताः॥२२॥ तत्रादौ कुंभकं कृत्वा चतुःषष्ट्यातु मात्रया। रेचयेत्षोडशैर्मात्रैर्नासेनैकेन सुंदरि॥२३॥
तयोश्च पूरयेद्वायुं शनैः षोडशमात्रया। प्राणस्यायमनं तेवं शोकं कुर्याज्जयी वपुः॥२४॥ पंचप्राणाः समाख्याता वायवः प्राणमाश्रिताः
प्राणो मुख्यतमस्तेषु सर्वप्राणभृतां सदा॥२५॥ ओष्ठनासिकयोर्मध्ये हृदये नाभिमंडले। पादांगुष्ठाश्रितं चैव सर्वांगेषु च तिष्ठति॥२६॥
नित्यं षोडशसंख्याभिः प्राणायामं समभ्यसेत्। मनसा प्रार्थितं याति सर्वपाप ऊर्ध्वी भवेत्॥२७॥ प्राणायामैर्दहेद्दोषान्धारणाभि
श्च किल्बिषान्। प्रत्याहाराच्च संसर्गं ध्यानेनानीश्वरान्गुणान्॥२८॥ प्राणायामं प्रातः स्नात्वा यः करोति दिने दिने। मातापितृगुरुघ्नो
पि त्रिभिर्वर्षैर्व्यपोहति॥२९॥ तदेतदाह प्राणान्नित्यादिना। प्राणान्संपीड्य देहं युक्तो नासया स्रत इति श्लोकोक्तासुष्ठायस्य समयुक्तो

।२।

२०

समेइति समे निम्नोन्नतरहिते देशे शुचौ शुद्धे शर्करावह्निवालुकाविवर्जिते। शर्करा क्षुद्रोपलाः वालुकास्तच्चूर्णं तथा शब्द
जलाश्रयादिभिः शब्दः कलहादिध्वनिः। जलं सर्वप्राणप्रेप्सोऽप्ये। मंडपाश्रयः। मनोऽनुकूले मनोरमे चक्षुपीडने प्रतिपाद्या
भिमुखे। छांदसो विसर्गलोपः। गुहानिवाताश्रयणे गुहायामेकांते निवाते समाश्रित्य प्रयोजयेत् प्रयुंजीत चित्तं परमात्मनि
१०। इदानीं योगमभ्यस्यतोऽभिव्यक्तिचिह्नानि वक्ष्यंते नीहार इत्यादिना। नीहारस्तुषारः। तद्वत् प्राणैः समाचितवृत्तिः प्रवर्तते। ततो
धूम इवाभाति। ततोऽर्क इवाभाति। ततो वह्निरिवाऽत्युष्णो वायुः प्रकाशदहनप्रवर्तते। बाह्यवायुरिव संक्षुभितो बलवान् विजृंभते। क
चित् खद्योतखचितमिवांतरिक्षमालक्ष्यते। विद्युदिव रोचिष्णु प्रवर्तते। शुद्धस्फटिकाकृतिः कदाचित् पूर्णशशिवत्। एतानि रूपाणि
योगे क्रियमाणे ब्रह्मण्याविष्क्रियमाणे निमित्ते पुरःसराण्यग्रगामीनि। तथा परमयोगसिद्धिः।११। पृथ्वीति पृथ्व्यप्तेजोऽनिलखे।

समे शुचौ शर्करावह्निवालुकाविवर्जिते शब्दजलाश्रयादिभिः। मनोऽनुकूलेन तु चक्षुपीडने गुहानिवाताश्रयणे प्रयोजये
त्।१०। नीहारधूमार्कानलानिलानां खद्योतविद्युत्स्फटिकशशीनां। एतानि रूपाणि पुरःसराणि ब्रह्मण्यभिव्यक्तिकराणि
योगे।११। पृथ्व्याप्यतेजोऽनिलखे समुत्थिते पंचात्मके योगगुणे प्रवृत्ते। न तस्य रोगो न जरा न मृत्युः प्राप्तस्य योगाग्निमयं शरी
रं।१२। लघुत्वमारोग्यमलोलुपत्वं वर्णप्रसादं स्वरसौष्ठवं च। गंधः शुभो मूत्रपुरीषमल्पं योगप्रवृत्तिं प्रथमां वदंति।१३। ॥

पृथिव्यादीनि भूतानि द्वंद्वैकत्वद्वारेण निर्दिश्यंते। तेषु पंचसु भूतेषु समुत्थितेषु पंचात्मके योगगुणे प्रवृत्ते इत्यस्य व्याख्यानं। कः पु
नः योगगुणः प्रवर्तते। पृथिव्या गंधः। तथाऽद्भ्यो रसः। एवमन्यत्र उक्तं। ज्योतिष्मती स्पर्शवती तथा रसवती परा। गंधवत्यपरा प्रो
क्ता चतस्रस्तु प्रवृत्तयः। आसां योगप्रवृत्तीनां यद्येकापि प्रवर्तते। प्रवृत्तयोगं तं प्राहुर्योगिनो योगचिंतकाः।१२। लघुत्वमिति। न तस्य
योगिनो रोगाज्ज्वराद् दुःखमभिमानसंबाधा भवति। कस्य। प्राप्तस्य योगाग्निमयं शरीरं। योगाग्निसंपुष्टदोषकलापं शरीरं प्रा
प्तस्य। स्पष्टमन्यत्।१३॥

बिंबं यथैवेति यथैव बिंबं सौवर्णं राजतं वा मृदयोपलिप्तं मृदादिना मलिनीकृतं पूर्वं पश्चात् सुधातं सुधौतमित्यस्मिन्नर्थे
सुधातमिति छांदसं। अग्न्यादिना विमलीकृतं तेजोमयं भ्राजते। तद्वत्तदेवात्मतत्त्वं प्रसमीक्ष्य दृष्ट्वा एकोऽद्वितीयः कृतार्थो भ
वते वीतशोकः। परेषां पाठे तद्वत् सतत्त्वं प्रसमीक्ष्य देही इति नत्वाप्ययमेवार्थः॥१४॥ कथं ज्ञाता वीतशोको भवतीत्याह यदेति
यदा यस्मादप्रमत्तस्यायमात्मतत्त्वेन स्वेनात्मना। किंविशिष्टेन दीपोपमेन दीपस्थानीयेन प्रकाशस्वरूपेण ब्रह्मतत्त्वं प्रप
श्येत् तुशब्दोऽवधारणे परमात्मानमात्मत्वेनैव जानीयादित्यर्थः। उक्तं च तदात्मानमेवावेदहं ब्रह्मास्मीति। कीदृशं। अन्य
स्मादजायमानं। ध्रुवं अप्रच्युतस्वरूपं सर्वतत्त्वैरविद्यातत्कार्यैर्विशुद्धं असंस्पृष्टं ज्ञात्वा देवं मुच्यते सर्वपाशैरविद्यादिभिः॥१५॥

यथैव बिंबं मृदयोपलिप्तं तेजोमयं भ्राजते तत्सुधांतं। तद्वात्मतत्त्वं प्रसमीक्ष्य देही एकः कृतार्थो भवते वीतशोकः॥१४॥
यदात्मतत्त्वेन तु ब्रह्मतत्त्वं दीपोपमेनेह युक्तः प्रपश्येत्। अजं ध्रुवं सर्वतत्त्वैर्विशुद्धं ज्ञात्वा देवं मुच्यते सर्वपाशैः॥१५॥ एषो
ह देवः प्रदिशोऽनु सर्वाः पूर्वो ह जातः स उ गर्भे अंतः। स विजातः स जनिष्यमाणः प्रत्यङ् जनास्तिष्ठति सर्वतोमुखः॥१६॥
यो देवोऽग्नौ योऽप्सु यो विश्वं भुवनमाविवेश। य ओषधीषु यो वनस्पतिषु तस्मै देवाय नमो नमः॥१७॥ इति द्वितीयोऽध्यायः।

परमात्मानमात्मत्वेन विजानीयादित्युक्तं तदेव भावयन्नाह एषहीति एष एव देवः प्रदिशः प्राच्याद्या दिश उपदिशश्च सर्वाः पूर्वो हि
जातः सर्वस्मात् हिरण्यगर्भात्मना स उ गर्भे अंतर्वर्तमानः स एव जातः शिशुः स जनिष्यमाणोऽपि स एव सर्वाश्च जनान् प्रत्यङ्
तिष्ठति। सर्वप्राणिगतानि मुखान्यस्येति सर्वतोमुखः॥१६॥ इदानीं योगवत्साधनांतराणि नमस्कारादीनि कर्तव्यत्वेन द
र्शयितुमाह। यो देव इति यो विश्वं भुवनं भुवनविरचितं संसारमंडलमाविवेश। य ओषधीषु व्रीह्यादिषु वनस्पतिषु अ
श्वत्थादिषु तस्मै विश्वात्मने भुवनमूलाय परमेश्वराय नमो नमः। द्विर्वचनमादरार्थं अध्यायपरिसमाप्त्यर्थं च॥१७॥
इति श्रीमद्गोविंदभगवत्पूज्यपादशिष्यपरमहंसपरिव्राजकाचार्यश्रीमच्छंकरभगवत्प्रणीते श्वेताश्वतरोपनिषद्भाष्ये २१
द्वितीयोऽध्यायः॥२॥ श्रीकृष्णाय वासुदेवाय नमो नमः॥

कथं मद्वितीयस्य परमात्मन ईशित्रीशितव्यादिभाव इत्याशंक्याह य एक इति। य एकः परमात्मा स जालवान् जालं माया
दुरत्ययत्वात्। तथा चाह भगवान् मम माया दुरत्ययेति। तद्वान् तदस्यास्तीति जालवान् मायावीत्यर्थः। ईशते ईष्टे मायोपा
धिः सन्। कैरीशनीभिः स्वशक्तिभिः। तथा चोक्तं ईशत ईशनीभिः परमशक्तिभिरिति। कान् सर्वांल्लोकानीशत ईशनी
भिः। कदा उद्भवे विभूतियोगसंभवे प्रादुर्भावे च एतद्विदुरमृतास्ते भवन्ति मरणधर्मा भवन्ति।१। कस्मात् पुनर्जालवानित्याशंक्याह
एको हीति॥ हि शब्दो यस्मादर्थे। यस्मादेक एव रुद्रः स्वतो न द्वितीयाय अवस्थितराय तस्थु ब्रह्मविदः परमार्थदर्शिनः। उक्तं च श्वेतैवंतः। ५
एको रुद्रो न द्वितीयाय तस्थुरिति। य इमांल्लोकानीशत नियमयति इहईशनीभिः। सर्वांश्च जनान्प्रत्यन्तरः प्रतिपुरुषमवस्थि

य एको जालवानीशत ईशनीभिः सर्वांल्लोकानीशत ईशनीभिः। य एवैक उद्भवे संभवे च य एतद्विदुरमृतास्ते भवन्ति।१।एको
हि रुद्रो न द्वितीयाय तस्थुर्य इमांल्लोकानीशत ईशनीभिः। प्रत्यङ् जनास्तिष्ठति संचुकोचान्तकाले संसृज्य विश्वा भुवना
नि गोपाः।२। विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात्। सं बाहुभ्यां धमति सं पतत्रैर्द्यावाभूमी जनयन्
देव एकः।३। यो देवानां प्रभवश्चोद्भवश्च विश्वाधिपो॥ ॥ ॥ ॥

तः। रूपं रूपं प्रतिरूपो बभूवेत्यर्थः। किं च संचुकोचान्तकाले प्रलयकाले। किं कृत्वा संसृज्य विश्वा भुवनानि गोपाः गोप्ता भूत्वा एत
दुक्तं भवति अद्वितीयः परमात्मा। न चासौ कुम्भकारवदात्मानं केवलं मृत्पिण्डस्थानीयमुपादानकारणमुपादत्ते किं तर्हि स्वशक्ति
विशेषं कुर्वन् सृष्ट्यादिविधेयतयाभिधीयत इति उत्तरो मंत्रः।२। तस्यैव विराडात्मनावस्थानं तत् सृष्टत्वं प्रतिपादयति विश्वतश्चक्षुरि
ति। सर्वप्राणिगतानि चक्षूंष्यस्येति विश्वतश्चक्षुः। अतः स्वेच्छयैव सर्वत्र चक्षुरूपादेः सामर्थ्यं विद्यत इति विश्वतश्चक्षुः। एवमुत्तरत्रयो
जनीयं। सं बाहुभ्यां धमति संयोजयतीत्यर्थः। अनेकार्थत्वाद्धातूनां। पादैर्गौः धमति द्विपदो मनुष्यादीन् पतत्रैः। किं कुर्वन् द्यावा
पृथिवी जनयन् देव एको विराजं सृष्टवानित्यर्थः।३। इदानीं तस्यैव सूत्रसृष्टिं प्रतिपादयन् मंत्रदृगभिप्रेतं प्रार्थयते। यो देवानामिति
। यो देवानामिन्द्रादीनां प्रभवहेतुरुद्भवहेतुश्च उद्भवे विभूतियोगः। विश्वस्याधिपो विश्वाधिपः पालयिता॥

लयस्थानं१ उत्पत्तिस्थानं।१।

श्वे० भा० २२ महर्षिः महांश्चासावृषिश्चेति महर्षिः सर्वज्ञ इत्यर्थः। हिरण्यगर्भं हितं रमणीयमत्युज्ज्वलं ज्ञानं गर्भोऽन्तःसारो यस्य तं जनयामास पूर्वं सर्गादौ। स नोऽस्मान् बुद्ध्या शुभया संयुनक्तु परमपदं प्राप्नुयामेति।४। पुनरपि तस्यैव स्वरूपं दर्शयन्नभिप्रेतमर्थं प्रार्थयते मंत्रद्वयेन। या ते रुद्र इत्यादि। हे रुद्र तव या शिवा तनूः अघोरा उक्तं तथा च तस्यैते तनुवौ घोराऽन्या शिवाऽन्येति। अथवा शिवा शुद्धा अविद्यातत्कार्यविनिर्मुक्ता सच्चिदानंदाद्वयब्रह्मरूपा न तु घोरा प्राणिविषमिवाह्लादिनी। अपापकाशिनी स्मृतिमात्रायनाशिनी पुण्यकाशिन्यक्रिकरी। तया आत्मना नोऽस्मान् शंतमया सुखतमया पूर्णेन दर्शय। हे गिरिशंत गिरौ स्थित्वा शं सुखं तनोतीति। अभिचाकशीहि अभिपश्य निरीक्षस्व श्रेयसा नियोजयस्वेत्यर्थः।५। किंच यामिषुं गिरिशंतेति। यामिषुं गिरि-

रुद्रो महर्षिः। हिरण्यगर्भं जनयामास पूर्वं स नो बुद्ध्या शुभया संयुनक्तु।४। या ते रुद्र शिवा तनूरघोराऽपापका-
शिनी। तया नस्तनुवा शंतमया गिरिशंताभिचाकशीहि।५। यामिषुं गिरिशंत हस्ते बिभर्ष्यस्तवे। शिवां गि-
रित्र तां कुरु मा हिंसीः पुरुषं जगत्।६। ततः परं ब्रह्म परं बृहंतं यथानिकायं सर्वभूतेषु गूढं। वि-
श्वस्यैकं परिवेष्टितारं ईशं तं ज्ञात्वाऽमृता भवंति।७। ।। ।।

शंत हस्ते बिभर्षि धारयसि अस्तवे जनने ते शिवां गिरित्र गिरिं त्रायत इति तां कुरु मा हिंसीः पुरुषमस्मदीयं जगदपि कृत्स्नं पुरुषं साकारं ब्रह्मप्रदर्शयेत्यभिप्रेतमर्थं प्रार्थितवान्।६। इदानीं तस्यैव कारणात्मनावस्थानं दर्शयन् ज्ञानादमृतत्वमाह। ततः परमिति। ततः पुरुषयुक्तात् जगतः परं कारणत्वात् कार्यभूतस्य प्रपंचस्य व्यापकमित्यर्थः। अथवा ततो जगदात्मनो विराजः परं। किं तद् ब्रह्म परं बृहंतं ब्रह्मणो हिरण्यगर्भात् परं बृहंतं महत्त्वापितात्। यथानिकायं यथाशरीरं सर्वभूतेषु गूढं अंतरावस्थितं। विश्वस्यैकं परिवेष्टितारं सर्वमंतः कृत्वा स्वात्मना सर्वं व्याप्यावस्थितं ईशं परमेश्वरं ज्ञात्वाऽमृता भवंति।७। इदानीं मुक्तार्थं द्रढयितुं मंत्रदृगनुभवं दर्शयिता पूर्णेनाद्वितीयब्रह्मात्मपरिज्ञानादेव परमपुरुषार्थप्राप्तिर्नान्येनेति दर्शयति

वेदाहमेतमिति वेद जानेतमेतं परमात्मानं। अथैतं प्रत्यगात्मानं साक्षिणं। किं। पुरुषं पूर्णं महांतं सर्वात्मत्वात्। आदित्यवर्णम्
प्रकाशरूपं तमसोऽज्ञानात् परस्तात् तमेव विदित्वाऽतिमृत्युमेति मृत्युमत्येति। कस्मादस्मान्नान्यः पंथा विद्यतेऽयनाय परमपद
प्राप्तये।८। कस्मात्पुनस्तमेव विदित्वाऽतिमृत्युमेतीत्युच्यते यस्मादिति। यस्मात् परं पुरुषात् परमुत्कृष्टमपरमन्यन्नास्ति य
स्मान्नाणीयोऽणुतरं न ज्यायो महत्तरं वास्ति वृक्ष इव स्तब्धो निश्चलो दिवि द्योतनात्मनि स्वमहिम्नि तिष्ठत्येकोऽद्वितीयः परमात्मा
तेनाद्वितीयेन परमात्मना इदं सर्वं पूर्णं नैरंतर्येण व्याप्तं पुरुषेण पूर्णेन सर्वमिदं सर्वं।९। इदानीं ब्रह्मणः पूर्वोक्तकार्यकारण
तां दर्शयन् ज्ञानिनाममृतत्वमितरेषां च संसारित्वं दर्शयति ततइति। ततइदं शब्दवाच्याज्जगत उत्तरतरं कारणं ततोऽप्युत्त
रं कार्यकारणविनिर्मुक्तं ब्रह्मैवेत्यर्थः। तदरूपं रूपादिरहितं अनामयं आध्यात्मिकादितापत्रयरहितत्वात्। य एतद्विदुरमृतस्तेना

वेदाहमेतं पुरुषं महांतमादित्यवर्णं तमसः परस्तात् तमेव विदित्वाऽतिमृत्युमेति नान्यः पंथा विद्यतेऽयनाय।८। यस्मात्परं ना
परमस्ति किंचिद्यस्मान्नाणीयो न ज्यायोऽस्ति कश्चित्। वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वं।९। ततो यदुत्तरत
रं तदरूपमनामयं य एतद्विदुरमृतास्ते भवंत्यथेतरे दुःखमेवापियंति।१०। सर्वाननशिरोग्रीवः सर्वभूतगुहाशयः। सर्वव्या
पी स भगवान् तस्मात्सर्वगतः शिवः।११। महान् प्रभुर्वै पुरुषः सत्वस्यैष प्रवर्तकः। सुनिर्मलामिमां प्राप्तिमीशानो ज्योतिरव्ययः।

हमस्मीति अमृता अमरणधर्माणस्ते भवंति। अथेतरे येन विदुः दुःखमेवापियंति।१०। इदानीं तस्यैव सर्वात्मत्वं दर्शयति सर्वान
नेति सर्वाण्याननानि शिरांसि ग्रीवाश्चास्येति सर्वाननशिरोग्रीवः। सर्वेषां भूतानां गुहायां बुद्धौ शेत इति सर्वभूतगुहाशयः। स
र्वव्यापी स भगवान् ऐश्वर्यादिसमष्टिः उक्तं च ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः। ज्ञानवैराग्ययोश्चैव षण्णां भग इती
रणा। भगवति यस्मादेवं तस्मात्सर्वगतः शिवः।१२। किंच महानिति। महान् प्रभुः समर्थो वै निश्चयेन जगदुदयास्थितिसंहा
रे सत्वस्यांतःकरणस्यैष प्रवर्तकः प्रेरयिता। किमर्थमुद्दिश्य सुनिर्मलामिमां स्वरूपावस्थालक्षणां प्राप्तिं परमपदप्राप्तिं ईशा
न ईशिता ज्योतिः परिशुद्धो विज्ञानप्रकाशः॥ अव्ययोऽविनाशीत्यर्थः॥ १२ ॥ ॥

श्वे० भा० २२

६१

अंगुष्ठमात्र इति। अंगुष्ठमात्रोऽभिव्यक्तिस्थानहृदयसुषिरपरिमाणेन तया पुरुषः पूर्णत्वात् पुरिशयनाद्वा। अंतरात्मा सर्वस्यांतरात्मभूतः स्थितः। सदा जनानां हृदये सन्निविष्टः हृदयस्थेन मनसाऽभिक्लृप्तः। मन्वीशो ज्ञानेशः। य एतद्विदुरमृतास्ते भवंति। पुरुषोऽन्तरात्मेत्युक्तं।१३। पुनरपि सर्वात्मानं दर्शयति सहस्रशीर्षेति सर्वस्य तावन्मात्रत्वप्रदर्शनार्थं उक्तं च अध्यारोपापवादाभ्यां निष्प्रपंचं प्रपंच्यत इति। सहस्राण्येव नेत्राणि शीर्षाण्यस्येति सहस्रशीर्षा पुरुषः पूर्णः। एवमुत्तरत्र योजनीयं। स भूमिं भुवनं सर्वतोऽन्तर्बहिश्च वृत्वा व्याप्यात्यतिष्ठद् अतीत्य भुवनं समधितिष्ठति दशांगुलं अनंतमपारमित्यर्थः। अथवा नाभेरुपरि दशांगुलं हृदयं तत्राधितिष्ठति।१४। ननु सर्वात्मत्वे सप्रपंचं ब्रह्म स्यात् तद्व्यतिरेकेणाभावादित्याह पुरुष एवेदमिति पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यं। यदन्नेनातिरोहति। यदिदं दृश्यते वर्तमानं यद्भूतं यच्च भव्यं भविष्यत् किंच उतामृतत्वस्येशानोऽम

अंगुष्ठमात्रः पुरुषोऽन्तरात्मा सदा जनानां हृदये सन्निविष्टः। हृदा मनीषा मनसाभिक्लृप्तो य एतद्विदुरमृतास्ते भवंति।
१३। सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्। स भूमिं विश्वतो वृत्वात्यतिष्ठद्दशांगुलं १४ पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यं।
उतामृतत्वस्येशानो यदन्नेनातिरोहति।१५। सर्वतः पाणिपादं तत् सर्वतोऽक्षिशिरोमुखं। सर्वतः श्रुतिमल्लो-
के सर्वमावृत्य तिष्ठति ॥ १६ ॥ ॥ सर्वेंद्रियगुणाभासं ॥ ॥ ॥ ॥

रणधर्मत्वस्य केवलस्येशानः। यदन्नेनातिरोहति यद्वृत्तेतस्येशानः।१५। पुनरपि निर्विशेषत्वं प्रतिपादयितुं दर्शयति सर्वत इति। सर्वतः पाणयः पादाश्चेति सर्वतः पाणिपादं तत्। सर्वतोऽक्षीणि शिरांसि च मुखानि च यस्य तत्सर्वतोऽक्षिशिरोमुखं। श्रुतिः श्रवणमस्येति श्रुतिमत्। लोके निकाये सर्वमावृत्य संव्याप्य तिष्ठति। उपाधिभूतपाणिपादादींद्रियाध्यारोपणेन ज्ञेयस्य तद्वत्ताशंका मा भूदित्येवमर्थमुत्तरतो मंत्रः।१६। सर्वेंद्रियेति। सर्वाणि च तानींद्रियाणि श्रोत्रादीनींद्रियाणि अंतःकरणपर्यंतानि सर्वेंद्रियग्रहणेन गृह्यंते। अंतःकरणबहिष्करणोपाधिभूतः सर्वेंद्रियगुणैरध्यवसायसंकल्पश्रवणवदाभासत इति सर्वेंद्रियगु-
णाभासं। सर्वेंद्रियैर्वर्जितमिव तज्ज्ञेयमित्यर्थः। ध्यायतीव लेलायतीवेति श्रुतेः।

श्वे०३

२२

कस्मात् पुनः कारणान्तरव्यापृतमिवेतिगृह्यत इत्याह। सर्वेन्द्रियविवर्जितं सर्वकारणरहितमित्यर्थः। अतो न च करणव्यापा
रैर्व्यावृत्तं तज्ज्ञेयं सर्वस्य जगतः प्रभुमीशानं। सर्वस्य शरणं परायणं बृहत् कारणं च।१७। किंच नवद्वारेति। नवद्वारे शिरसि
सप्त द्वाराणि द्वे अवाची पुरे देही विज्ञानात्मा भूत्वा कार्य्यकारणोपाधिः सन् हंसः परमात्मा हंत्यविद्यात्मकं कार्य्यमिव लेलायते
चलति बहिर्विषयग्रहणाय। वशी सर्वस्य लोकस्य स्थावरस्य चरस्य च। एवं तावत् सर्वात्मकं ब्रह्म प्रतिपादितं।१८। अथेदानीं
निर्विकारानंदस्वरूपेणानुदितानस्तमितं ज्ञानात्मनावस्थितं परमात्मानं दर्शयितुमाह अपाणिपाद इति। नास्य पाणिपादावि
त्यपाणिपादः। अथ जवनो दूरगामी गृहीता पाण्याद्यभावेपि सर्वग्राही। पश्यति सर्वमचक्षुरपि सन्। शृणोत्यकर्णोऽपि। स
वेत्ति वेद्यं सर्वं शब्दादि अमनस्कोऽपि। न च तस्यास्ति वेत्ता। नान्योऽतोऽस्ति द्रष्टेति श्रुतेः। तमाहुरग्र्यं प्रथमं सर्वकारणत्वात् पुरुषं

सर्वेंद्रियविवर्जितं। सर्वस्य प्रभुमीशानं सर्वस्य शरणं बृहत्।१७। नवद्वारे पुरे देही हंसो लेलायते बहिः॥
वशी सर्वस्य लोकस्य स्थावरस्य चरस्य च।१८। अपाणिपादो जवनो गृहीता पश्यत्यचक्षुः स शृणोत्यकर्णः।
स वेत्ति वेद्यं न च तस्यास्ति वेत्ता तमाहुरग्र्यं पुरुषं महांतं।१९। अणोरणीयान् महतो महीयानात्मा गुहायां
निहितोऽस्य जंतोः। तमक्रतुं पश्यति वीतशोको धातुः प्रसादान्महिमानमीशं।२०॥ ॥ ॥

पूर्णं महांतं।१९। किंच अणोरणीयानिति। अणोः सूक्ष्मादप्यणीयानणुतरः। महतो महत्परिमाणान्महीयान्
महत्तरः। स आत्मास्य जंतोर्ब्रह्मादिस्तंबपर्य्यंतस्य प्राणिजातस्य। गुहायां हृदये निहित आत्मभूतः स्थित इत्यर्थः।
तमात्मानं अक्रतुं विषयभोगसंकल्परहितमात्मनो महिमानं कर्म्मनिमित्तवृद्धिक्षयरहितमीशं। पश्यत्ययमहमस्मीति सा
क्षाज्जानाति यः स वीतशोको भवति। केन तर्हि सौ पश्यति। धातुरीश्वरस्य प्रसादात्। प्रसन्ने हि परमेश्वरे तद्याथात्म्यज्ञानमु
त्पद्यते। अथवा इंद्रियाणि धातवः शरीरस्य धारणात् तेषां प्रसादाद्विषयदोषबलाद्यपनयनात्। अन्यथा दुर्विज्ञेय आत्माका
मिभिः प्राकृतपुरुषैः॥२०॥

श्वे०
भा०
२४

उक्तमर्थं द्रढयितुं मन्त्रदृगनुभवं दर्शयति वेदाहमेतमिति वेद जानेऽहमेतमजरं विपरिणामधर्मवर्जितं। पुराणं पुरातनं। सर्वात्मानं सर्वेषामात्मभूतं सर्वगतं विभुत्वादाकाशवद्व्यापकत्वात्। यस्य च जन्मनिरोधं उत्पत्त्यभावं प्रवदन्ति ब्रह्मवादिनो हि नित्यं यस्मादित्यर्थः। २१। इति श्रीमद्गोविंदभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्यस्य श्रीमच्छंकरभगवतः कृतौ श्वेताश्वतरोपनिषद्भाष्ये तृतीयोऽध्यायः। ३। ॐ तत्सद्ब्रह्म॥ ॥गहनत्वादस्यार्थस्य भूयोभूयो वक्तव्य इति चतुर्थोऽध्याय आरभ्यते। य एक इति। य एकोऽद्वितीयः परमात्मा अवर्णो जात्यादिरहितो निर्विशेष इत्यर्थः। बहुधा नानाशक्तियोगात् वर्णाननेकान् निहितार्थो गृहीतप्रयोजनः स्वार्थनिरपेक्ष इत्यर्थः। दधाति विदधाति अदः। वि चैति व्येति च अन्ते लयकाले चाच्च शब्दादे
वेदाहमेतमजरं पुराणं सर्वात्मानं सर्वगतं विभुत्वात्। जन्मनिरोधं प्रवदन्ति यस्य ब्रह्मवादिनो हि प्रवदन्ति नित्यं। २१। इति तृतीयोऽध्यायः। ३। य एकोऽवर्णो बहुधा शक्तियोगात् वर्णाननेकान्निहितार्थो दधाति। वि चैति चान्ते विश्वमादौ स देवः स नो बुद्ध्या शुभया संयुनक्तु। १। तदेवाग्निस्तदादित्यस्तद्वायुस्तदु चन्द्रमाः। तदेव शुक्रं तद्ब्रह्म तदापस्तत्प्रजापतिः। २। त्वं स्त्री त्वं पुमानसि त्वं कुमार उत वा कुमारी। त्वं जीर्णो दण्डेन वञ्चसि त्वं जातो भवसि विश्वतोमुखः। ३। नीलः पतंगो हरितो लोहिताक्षस्तडिद्गर्भ ऋतवः समुद्राः। अनादिमत्त्वं विभुत्वेन वर्तसे यतो जातानि भुवनानि विश्वा। ४। अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः।
ति मध्ये एति यस्मिन् विश्वं स देवो द्योतनस्वभावो विज्ञानैकरस इत्यर्थः। स नोऽस्मान् शुभया बुद्ध्या संयुनक्तु संयोजयतु। यस्मात्स एव सृष्टा तस्मिन्नेव च लयं तस्मात्स एव सर्वं। १। न ततो विभक्तमस्तीत्याह मन्त्रत्रयेण तदेवेति। तदेवात्मतत्त्वमग्निः तदादित्यः। एवशब्दः सर्वत्र संबध्यते। तदेव शुक्रमिति दर्शनात्। शेषमृजु। तदेव शुक्रं शुद्धमन्यदपि दीप्तिमन्नक्षत्रादि तद्ब्रह्म तत् हिरण्यगर्भात्मा तदापः स प्रजापतिर्विराडात्मा। २। त्वमेवेति सर्वत्र संबध्यते स्पष्टो मन्त्रार्थः। ३। नील इति त्वमेव नीलः पतंगो भ्रमरः। पतनाद्गच्छतीति पतंगः। हरितो लोहिताक्षः शुकादिनिकृष्टः प्राणिनस्त्वमेवेत्यर्थः। तडिद्गर्भो मेघः। ऋतवः समुद्राः। यस्मात्त्वमेव सर्वस्यात्ममृतं तस्मादनादिस्त्वमेव त्वमेवाद्यन्तशून्यः। विभुत्वेन व्यापकत्वेन यतो जातानि भुवनानि विश्वानि। ४। इदानीं तेजोऽबन्नलक्षणां प्रकृतिं क्वचिदोपनिषत्प्रसिद्धामज रूपकल्पनया दर्शयति। अजामेकामिति। अजां प्रकृतिं लोहितशुक्लकृष्णां तेजोऽबन्नलक्षणां बह्वीः प्रजाः सृजमानामुत्पादयन्तीं ध्यान २४

अजो ह्येको विज्ञानात्मा अनादिकामकर्मविनाश्रितः स्वयमात्मानं मन्यमानो जुषमाणः सेवमानोऽनुशेते भजते। अन्या चाप्यप
देशपूर्वकाप्यावसादिताविद्यां यकारो जहाति त्यजति।५। इदानीं सूत्रभूतौ परमार्थवस्त्ववधारणार्थं मन्त्रमुपन्यस्यते द्वा इति। द्वौ वि
ज्ञानपरमात्मनौ। सुपर्णा सुपर्णौ शोभनपतनौ शोभनगमनौ सुपर्णौ पक्षिसामान्याद्वा तौ पर्णौ सयुजा सयुजौ सर्वदा संयुतौ।
सखाया सखायौ समानाख्यानौ समानाभिव्यक्तिकारणौ। एवंभूतौ सन्तौ समानं एकं। वृक्षं वृक्षमिवोच्छेदसामान्याद्वृक्षं शरीरं प
रिषस्वजाते परिष्वक्तवन्तौ समाश्रितवन्तावेतौ। तयोरन्योऽविद्याकामवासनाश्रयलिंगोपाधिर्विज्ञानात्मा पिप्पलं कर्मफलं सुख
दुःखलक्षणं स्वादु अनेकविचित्रवेदनास्वादरूपमत्ति उपभुंक्ते। विवेकतोऽनश्नन्नन्यो नित्यशुद्धबुद्धमुक्तस्वभावः परमेश्वरोऽभि
चाकशीति सर्वमपि पश्यन्नास्ते।६। तत्रैवं सति समाने वृक्षे शरीरे पुरुषो भोक्ताऽविद्याकामकर्मफलरागादिगुरुभाराक्रान्तोऽ

अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः।५। द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिष-
स्वजाते। तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति।६। समाने वृक्षे पुरुषो निमग्नोऽनीशया
शोचति मुह्यमानः॥ जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः॥ ७॥ ॥

लाबुरिव समुद्रजले निमग्नो निश्चयेन देहात्मभावमापन्नोऽयमेवाहममुष्य पुत्रोऽस्य नप्ता कृशः स्थूलो गुणवान् निर्गुणः सुखी दुःखी
त्येवं प्रत्ययो नास्त्योऽन्यस्मादिति जायते म्रियते संयुज्यते च संबंधिबांधवैः। अतोऽनीशया न कस्यचित्समर्थोऽहं पुत्रो मम नष्टो मृता
मे भार्या किं मे जीवितेनेत्येवं दीनभावोऽनीशया शोचति संतप्यते मुह्यमानोऽनेकैरनर्थप्रकारैरविवेकतया चिन्तामा
पद्यमानः स एव प्रेततिर्यङ्मनुष्यादियोनिष्वापतन् दुःखमापन्नः कदाचिदनेकजन्मसु शुद्धधर्मसंचयनिमित्तेन केनचित्पर
मकारुणिकेन दर्शितयोगमार्गोऽहिंसासत्यब्रह्मचर्यसर्वत्यागसमाहितात्मा सन् शमादिसंपन्नो जुष्टं सेवितमनेकयोगमार्गैर्य
दा यस्मिन्काले पश्यति ध्यायमानोऽन्यं वृक्षोपाधिलक्षणविलक्षणमसंसारिणं अशनायाद्यसंस्पृष्टं सर्वान्तरं परमात्मानमीशं अय
महमस्म्यात्मा सर्वस्य समः सर्वभूतान्तरस्थो नेतरोऽविद्याजनितोपाधिपरिच्छिन्नो मायात्मेति विभूतिं महिमानं चेति जगद्रूपम
स्यैव महिमा परमेश्वरस्येति यदैवं पश्यति तदा वीतशोको भवति सर्वस्माच्छोकसागराद्विप्रमुच्यते कृतकृत्यो भवतीत्यर्थः। अथवा

इदानीं तद्विदः कृतार्थतां दर्शयति ऋच इति वेदत्रयाणि यो वेदत्रयवेद्ये अक्षरे परमे व्योमन् व्योम्याकाशकल्पे यस्मिन् दे-
वा अधि विश्वे निषेदुः आश्रितास्तिष्ठन्ति यस्तं परमात्मानं न वेद किमृचा करिष्यति। य इत्तद्विदुस्त इमे समासते कृतार्थास्ति-
ष्ठन्ति।८। इदानीं तस्यैवाक्षरस्य मायोपाधिकं जगत्स्रष्टृत्वं तन्निमित्तत्वं भेदेन दर्शयति छन्दांसीति छन्दांसि ऋग्यजुःसामाथर्वा-
ङ्गिरसाख्या वेदा वेदयज्ञादयो यूपसंबंधरहिता विहिताः क्रियाः। यज्ञाः ज्योतिष्टोमादयः क्रतवः। व्रतानि चान्द्रायणादीनि भू-
तमतीतं भव्यं भविष्यत्। यदितयोर्मध्यवर्त्तिवर्त्तमानं सूचयति। चशब्दः समुच्चयार्थः। यज्ञादिसाध्ये कर्म्मणि प्रपंचे भूतादौ
च वेदा एव मानमित्येतद्वदन्ति यच्चान्यत्सर्वं न संवध्यते। अस्मात्प्रकृतादक्षराद्ब्रह्मणः पूर्वोक्तं सर्वं प्रसूयत इति संबंधः। अविका-
रिब्रह्मणः कथं प्रपंचोपादानत्वमित्यत आह मायीति कूटस्थव्यापिस्वप्रकाशत्वात् सर्वस्रष्टृत्वमुपपन्नमित्येतत् विश्वं पूर्वोक्तप्रपंचं

ऋचो ऽक्षरे परमे व्योमन् यस्मिन् देवा अधि विश्वे निषेदुः। यस्तन्न वेद किमृचा करिष्यति य इत्तद्विदुस्त इमे समासते
।८। छन्दांसि यज्ञाः क्रतवो व्रतानि भूतं भव्यं यच्च वेदा वदन्ति। अस्मान्मायी सृजते विश्वमेतत् तस्मिंश्चान्यो मायया स-
न्निरुद्धः।९। मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरं तस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगत्॥१०॥ ॥ ॥

सृजते उत्पादयति स्वमायया कल्पिते तस्मिन् भूतादिप्रपंचे माययैवान्यो वसन् सन्निरुद्धः संबद्धः सन् अविद्यावशगो भूत्वा संसारस-
मुद्रे भ्रमतीत्यर्थः। पूर्वोक्तायाः प्रकृतेर्मायात्वं तदधिष्ठानात् सच्चिदानंदरूपब्रह्मणस्तदुपाधिवशान्मायित्वं च। चिद्रूपस्य मायावशात्
कल्पितावयवभूतैः कार्यकारणसंघातैः सर्वभूरादीदं परिदृश्यमानं जगद्व्याप्तं चेत्याह मायांतिति जगत्प्रकृतित्वेनाद्यस्तात् स-
र्वत्र प्रतिपादिता प्रकृतिर्मायैवेति विद्याद्विजानीयात् तुशब्दोऽवधारणार्थः। महांश्चासावीश्वरश्चेति महेश्वरस्तं मायिनं मायायाः
सत्तास्फूर्त्यादिप्रदतयाधिष्ठानत्वेन प्रेरयितारमेव विद्यादिति पूर्वेण संबंधः। तस्य प्रकृतस्य परमेश्वरस्य रज्ज्वाद्यधिष्ठाने प्रक-
ल्पितसर्पादिस्थानीयैर्मायिकैः स्वावयवैरध्यासद्वारा इदं भूतादि सर्वं व्याप्तमेव पूर्णमित्येतत् तुशब्दस्त्ववधारणार्थः।१०।
मायातत्कार्यादियोनेः कूटस्थस्य स्वप्रकाशितोऽधिष्ठानत्वं व्यक्तादिकार्योत्पत्तिहेतुत्वं तेनैव सर्वाधिष्ठानत्वोपलक्षितसच्चिदा

नंदवपुषा ब्रह्मास्मीत्येकत्वज्ञानान्मुक्तिं वृद्धपूर्यतीति यो योनिंमिति । यो मायाविनिर्मुक्तानंदैकघनः परमेश्वरः योनिं योनिमितिवी
प्सया मूलप्रकृतिमीया अवांतरप्रकृतयश्च सूचिताः ताः प्रकृतीः सत्तास्फूर्तिप्रदत्वेनाधितिष्ठति अंतर्यामिरूपेण यच्छाका
पो तिष्ठन्नित्यादिश्रुतेः । एको ऽद्वितीयः । यस्मिन्मायाद्यधिष्ठाते ईश्वरे इदं सर्वं जगदुदयसंहारकाले समेति संगच्छते लयं प्राप्नो
ति । पुनः सृष्टिकाले विवयमेति आकाशादिरूपेण नाना भवति । तं प्रकृतमधिष्ठातारमीशानं नियंतारं वरदं मोक्षप्रदं देवं द्योत
नात्मकं ईड्यं वेदादिस्तुत्यं निचाय्य निश्चयेन ब्रह्माहमस्मीत्यपरोक्षीकृत्य मुमुक्षुः दैवी प्रत्यक्षीकृता या सर्वोपरमलक्षणा सार्वज्ञनी
शांतिर्येदमादर्शिता तां शमिकोऽशमिमां शांतिं सर्वदुःखविनिर्मुक्तः सुखैकतानस्वरूपां प्रतीतिमिति यावत् । गुरूपदिष्टतत्त्वमादिवाक्य
जन्यसुखवत्त्वज्ञानेनाविद्यातत्कार्यादिविरमान्निवृत्त्या ऽत्यंतं पुनरावृत्तिरहितं यथा भवति तथा एति एकरसो भवतीत्येतत् ॥११॥
यो योनिं योनिमधितिष्ठत्येको यस्मिन्निदं संच विचैति सर्वं । तमीशानं वरदं देवमीड्यं निचाय्येमां शांतिमत्यंतमेति ।
११। यो देवानां प्रभवश्चोद्भवश्च विश्वाधिपो रुद्रो महर्षिः । हिरण्यगर्भं पश्यत जायमानं स नो बुद्ध्या शुभया संयुनक्तु ॥
१२। यो देवानामधिपो यस्मिंल्लोका अधिश्रिताः । य ईशे ऽस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम । १३ ॥
सूत्रात्मानं प्रत्यविरतमभिमुखतयावीतं तं परमेश्वरं प्रति स्वखंडिततत्त्वज्ञानसिद्धये प्रार्थनामाह । यो देवानामिति । पूर्वमेवास्य
प्रतिपादितो ऽर्थः । १२। ब्रह्मप्रमुखानां देवानां स्वामित्वमाकाशादिलोकाश्रयत्वं प्रमात्रादीनां नियंतृत्वं बुद्धिशुद्धिद्वारा सम्यग्ज्ञा
नसिद्ध्यर्थं मुमुक्षुभिः प्रार्थ्यमानत्वं च परमेश्वरस्याह । यो देवानामधिप इति । प्रकृतः परमेश्वरो देवानां ब्रह्मादीनामधिपः
स्वामी । यस्मिन्परमेश्वरे सर्वकारणे भूरादयो लोका अधिश्रिता अधि उपरि श्रिता आश्रितास्ताइतियावत् । प्रकृतः परमेश्वरः अ
स्य द्विपदो मनुष्यादेः चतुष्पदः पश्वादेश्च ईशे ईष्टे तकारलोपश्छांदसः । कस्मै कायानंदरूपाय । स्मै भावो ऽपि छांदसः । देवाय
द्योतनात्मने तस्मै हविषा चरुपुरोडाशादिद्रव्येण विधेम परिचरेम । विधेः परिचरणकर्मण एतद्रूपं ॥ १३ ॥

श्वे० भा० २६

परस्यातिसूक्ष्मत्वं जगच्चक्रे साक्षित्वेनावस्थितत्वं निखिलजगत्स्रष्टृत्वं सर्वात्मकत्वं तज्ज्ञानादध्यज्जनानां मुक्तिश्चेत्येतदुक्तोऽर्थस्ता
त्प्रतिपादितश्च यद्यपि तथापि बुद्धिसौकर्यार्थं पुनरप्याह सूक्ष्मेति। पृथिव्याद्यव्याकृतान्तमुत्तरोत्तरं सूक्ष्मसूक्ष्मतरत्वमपेक्ष्य स्वर
स्य तदपेक्षया सूक्ष्मतमत्वमाह। सूक्ष्मातीति। कलिलस्याऽविद्यातत्कार्यात्मकदुर्गस्य गहनस्य मध्ये स्थितः साक्षिरूपेणावस्थितत्वं
सनकादिभिर्ब्रह्मादिदेवैश्चाधिकारिपुरुषैरप्यात्मतयाप्राप्यत्वं साधनचतुष्टयादियुतास्मदादिना। १४। मोक्षसिद्धिमाह। स एवेति
। स एव प्रकृतः काले व्यतीतकल्पेषु जीवसंचितकर्मपरिपाकसमये भुवनस्य गोप्ता तत्तत्कर्मानुगुणतया रक्षिता। विश्वाधिपः विश्व
स्वामी। सर्वभूतेषु गूढो ब्रह्मादिस्तम्बपर्यन्तेषु साक्षिमात्रतयाऽवस्थितः। यस्मिन् चिदघनानन्दवपुषि परे युक्ता ऐक्यं प्राप्ताः। ते के। ब्रह्मर्ष
यः सनकादयः देवताश्च हिरण्यगर्भादयः तमीश्वरमेवमुक्तप्रकारेण अहं ब्रह्मास्मीति ज्ञात्वाऽपरोक्षीकृत्य मृत्युपाशान् मृत्युरविद्या

सूक्ष्मातिसूक्ष्मं कलिलस्य मध्ये विश्वस्य स्रष्टारमनेकरूपं विश्वस्यैकं परिवेष्टितारं ज्ञात्वा शिवं शान्तिमत्यन्तमेति। १४ स एव
काले भुवनस्य गोप्ता विश्वाधिपः सर्वभूतेषु गूढः। यस्मिन् युक्ता ब्रह्मर्षयो देवताश्च तमेवं ज्ञात्वा मृत्युपाशान् छिनत्ति। १५।
घृतात्परं मण्डमिवातिसूक्ष्मं ज्ञात्वा शिवं सर्वभूतेषु गूढं। विश्वस्यैकं परिवेष्टितारं ज्ञात्वा देवं मुच्यते सर्वपाशैः। १६। एष देवो विश्वकर्मा।

तमोरूपादयश्च पाशाः पश्यन्त इति पाशास्तान्। मृत्युर्वै तम इति श्रुतेः। तत्कार्यकामकर्म छिनत्ति नाशयति ऐक्यरूपस्वप्रका
शाग्निना दहतीत्यर्थः। १५। परस्यात्यन्तातिसूक्ष्मतमत्वमानन्दातिशयवत्त्वं निर्दोषवत्त्वं जीवेषु स्थितिसूक्ष्मतया स्वरूपेणावस्थानत्वं
सर्वस्यापि सत्तादिप्रदतया व्यापित्वं तदेकत्वज्ञानात् पाशहानिं च दर्शयति। घृतादिति। घृतोपरि विद्यमानं मण्डं सारस्तद्वत्तामति
प्रीतिविषयो यथा तथा मुमुक्षूणां अतिसाररूपानन्दप्रदत्वेन निरतिशयप्रीतिविषयः परमात्मा तद्वदुत्तमसारवदानन्दरूपेणात्यन्तसू
क्ष्मं ज्ञात्वा शिवमित्येतद्व्याख्यातं सर्वभूतेषु गूढं ब्रह्मादिस्तम्बपर्यन्तेषु जन्तुषु कर्मफलभागसाक्षित्वेन प्रत्यक्तया वर्तमानेऽपि नैरस्ति
रस्कृतस्वभावं। उत्तरार्द्धं व्याख्यातं। १६। निर्भेदमुख्यैकतानात्मनो विश्वकृत्त्वं तच्छापितं संन्यासीभिरापाद्य भेदरूपं चाह। एष इति।
एषः प्रकृतो देवो द्योतनात्मकः। विश्वकर्मा महदादिविश्वं कर्म क्रियत इति कर्म मायावेशाद् विश्वरूपकार्यमस्येति विश्वकर्मा॥ ॥ २६

महांश्चासावात्मेति महात्मा सर्वव्यापीत्यर्थः। सदा सर्वदा जनानां हृदये परमे व्योम्नि हृदाकाशे जलाद्युपाधिषु सूर्यप्रतिबिंबव
त्सन्निविष्टः सम्यक् स्थित इत्येतत्। स एव साक्षिरूपेण हृदा हृ-ञ् हरणे इति स्मरणाद्धरतीति हृत् तेन हृदा नेति नेतीति निषेधोप
देशेन। मनीषा स्वयंप्रकाशोऽयमात्माऽयमनात्मेत्येतया विवेकबुद्ध्या। मनसापि विचारसाध्ये कलज्ञानेन च। अभिक्लृप्तः प्र
काशितोऽखंडैकरसत्वेनाभिव्यक्त इत्येतत्। ये जना साधनचतुष्टयसंपन्नाः संन्यासिनः एतत् तत्त्वमस्यादिवाक्यप्रतिपाद्यं केवलरू
पाखंडैकरसमिति यावत्। विदुः ब्रह्माहमस्मीत्यपरोक्षीकुर्युस्ते यथोक्तज्ञानिनोऽमृता भवंति अमरणधर्माणः पुनरावृत्तिर
हिता भवंतीत्यर्थः। १७। कालत्रयेऽपि मुक्तौ प्रियादौ च परमात्मा कूटस्थ इति निष्ठया जाग्रत्स्वप्नयोरपि भ्रांत्या सद्वितीयत्वावभा
सेः वस्तुतस्तु सदा निर्भेद एवेत्याह। यदेति। यदा यस्यामवस्थायामतमो न तमोऽस्येत्यतमः तत्त्वमादिवाक्यजन्यज्ञानेन दीपस्था

महात्मा सदा जनानां हृदये सन्निविष्टः। हृदा मनीषा मनसाऽभिक्लृप्तो य एतद्विदुरमृतास्ते भवंति॥
१७॥ यदाऽतमस्तन्न दिवा न रात्रिर्न सन्न चासच्छिव एव केवलः॥ तदक्षरं तत्सवितुर्वरे
ण्यं प्रज्ञा च तस्मात् प्रसृता पुराणी॥ १८॥ ॥ ॥ ॥

नीयेन दग्ध्याविद्या तत्कार्यरूपतमस्कत्वात् तदा तत्काले न दिवा दिवारोपोऽपि नास्ति न रात्रिस्तत्तारोपोऽपि नास्तीति सर्वत्रानुषंगः।
न सन् सत्त्वारोपोऽपि। नासन् अभावारोपोऽपि। तर्हि तत्त्वं सर्वं शून्यमेव जातमिति बौद्धमतविशेषमाशंक्याह। शिव एवेति। शिव एव
शुद्धस्वभावो निर्विकल्पः शून्यमेवेति निपातार्थः। केवलोऽविद्यादिविकल्पशून्यः तदक्षरं तदुक्तस्वरूपं न क्षरतीत्यक्षरं नित्यं तत् त
त्पदलक्ष्यं सवितुरादित्यादिमंडलाभिमानिनो वरेण्यं संभजनीयं प्रज्ञा गुरूपदेशात् तत्त्वमादिवाक्यजा बुद्धिः चकार एवकारार्थः
तस्मात् शुद्धत्वहेतोः प्रसृता नित्या विवेकादिमत्सु संन्यासिषु व्याप्ता पूर्णत्वाकारेण। पुराणी ब्रह्माणमारभ्य परस्परया व्याप्ता अना
दिसिद्धा। १८। कूटस्थस्य ब्रह्मण ऊर्ध्वादिषु दिक्षु केनाप्यपरिग्राह्यत्वमद्वितीयत्वात् केनाप्यतुलितत्वं कालदिगाद्यनवच्छिन्न

श्वे० भा० २७

यशोरूपत्वं चाह। नैनमिति। एनं प्रकृतं सर्वपरिच्छिन्नरूपत्वान्निरंशत्वान्निरवयवत्वाच्च ऊर्ध्वदिग्गुदितं कश्चिदपि न परिजग्रभ
त् परिग्रहीतुं न शक्नुयात् तिर्यञ्चं दिग्देशानवस्थितत्वात् तिर्यञ्चमपि परिग्रहीतुं न शक्नुयात्। मध्ये निरंशत्वादद्वितीय
त्वाच्च मध्यस्थानाभावात् मध्येपि कश्चिदपि न पर्यग्रहीत् न तस्य प्रतिमाऽस्तीति तस्येश्वरस्याखण्डसुखानुभवत्वादेता
दृशाद्वितीयाभावात् प्रतिमा उपमा नास्ति। यस्य नाम महद्यशः। यस्येश्वरस्य नामाभिधानं महद्दिगाद्यनवच्छिन्नं सर्वत्र
परिपूर्णं यशः कीर्तिः न तस्य प्रतिमास्तीत्यन्वयः।१९। ईशस्येन्द्रियाद्यविषयतां प्रत्यग्रूपतां तदैक्यज्ञानामोदत्तां चाह। न
संदृश इति अस्य प्रकृतेश्वरस्य रूपं स्वरूपं रूपादिरहितं निर्विशेषं स्वप्रकाशाखण्डसुखानुभवं संदृशे चक्षुरादिग्रहणयो
ग्यप्रदेशे न तिष्ठति तद्विषयो न भवतीत्येतत्। इंद्रियागोचरत्वादेवैनं प्रकृतं चक्षुरित्युपलक्षणं सर्वेन्द्रियैरपि कश्चन कोऽपि न
नैनमूर्ध्वं न तिर्यञ्चं न मध्ये परिजग्रभत्। न तस्य प्रतिमा अस्ति यस्य नाम महद्यशः।१९। न संदृशे तिष्ठति रूपमस्य न चक्षुषा
पश्यति कश्चनैनं। हृदा हृदिस्थं मनसा य एनमेवं विदुरमृतास्ते भवंति।२०। अजात इत्येवं कश्चिद्भीरुः प्रतिपद्यते॥ ॥
पश्यति तद्विषयतया ग्रहीतुं न शक्नुयात्। यच्चक्षुषा न पश्यति येन चक्षूंषि पश्यतीत्यादिश्रुतेः। हृदा शुद्धबुद्ध्या एतद्व्याख्या
तं मनसेति। हृदिस्थं हृदाकाशगुहास्थं प्रत्यक्तया तत्त्वावस्थितं ये साधनचतुष्टयादियुक्ताः संन्यासिनोऽधिकारिण एनं प्र
कृतं ब्रह्मात्मनामेवामित्थं ब्रह्माहमस्मीत्यपरोक्षेण विदुर्जानंति तेनापरोक्षीकरणमहिम्नाऽमृता भवंति अमरणधर्माणो भ ब्रह्मात्मना
वंति। मरणहेतुविद्यादेस्तत्त्वज्ञानाऽग्निना दग्धत्वात् पुनर्देहांतरं न भजंतीत्यर्थः।२०। रुद्रानीतत्प्रसादादेव इष्टानिष्टप्राप्ति
परिहाराविति मत्वा तमेव परमेश्वरं प्रार्थयते मंत्रद्वयेन। अजात इति इति शब्दो हेत्वर्थः। यस्मात्त्वमेवाजातो जन्मजरा
शनायापिपासाद्यर्मवर्जितः। इतरत् सर्वं विनाशि दुःखात्मकं तस्माज्जन्मजरामरणाशनायापिपासाशोकमोहान्विता
त्संसाराद्भीरुर्भीतिः सन् कश्चिदेक एव परतंत्रस्त्वामेव शरणं प्रपद्ये मादृशो वा कश्चित्प्रपद्यत इति प्रथममन्वधीयते ॥ २७

हे रुद्र यत्ते दक्षिणं मुखं उत्साहजननं ध्यातमाह्लादकरमित्यभिप्रायः। अथवा दक्षिणस्यां दिशि भवं दाक्षिणं मुखं तेन मां पाहि
नित्यं सर्वदा ॥२१॥ किंच मा न इति। मा रीरिष इति सर्वत्र संबध्यते। मा रीरिषः रोषणं मरणं विनाशं मा कार्षीः। नोऽस्माकं
तोके पुत्रे तनये पौत्रे न आयुषि। मा नो गोषु मा नोऽश्वेषु मा रीरिषः। ये चास्माकं वीरा विक्रान्ता भृत्यास्तान् हे रुद्र भामितः
क्रोधितः सन्न वधीः कस्मात् यस्माद्धविष्मन्तो हविषा युक्ताः सदमित्त्वा हवामहे आह्वयामः सदमित्वा मा वधीरित्यर्थः ॥२२॥
इति श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्यस्य श्रीशंकरभगवतः कृतौ श्वेताश्वतरोपनिषद्भाष्ये
चतुर्थोऽध्यायः ॥४॥ ॐ तत्सत् ॐ। चतुर्थाध्यायशेषमपूर्वार्थं प्रतिपादयितुं पंचमोऽध्याय आरभ्यते। द्वे अक्षर इत्या-
दिना। द्वे विद्याऽविद्ये यस्मिन्नक्षरे ब्रह्मणो हिरण्यगर्भात् परे ब्रह्मपरे परस्मिन् वा ब्रह्मणि। अनंते देशतः कालतो वस्तुतो

"द्वे अक्षरे ब्रह्मपरे त्वनंते विद्याऽविद्ये निहिते यत्र गूढे। क्षरं त्वविद्या ह्यमृतं तु विद्या विद्याविद्ये ईशते यस्तु सोऽन्यः॥
१ यो योनिं योनिमधितिष्ठत्येको विश्वानि रूपाणि योनीश्च सर्वाः। ऋषिं प्रसूतं कपिलं यस्तमग्रे ज्ञानैर्बिभर्ति जायमानं च प-

वाऽपरिच्छिन्ने। यत्र यस्मिन् द्वे विद्याऽविद्ये निहिते स्थापिते गूढे न अभिव्यक्ते। विद्याऽविद्ये विविच्य दर्शयति। क्षरं त्वविद्या
क्षरणहेतुः संसृतिकारणं। अमृतं तु विद्या मोक्षहेतुः। यस्तु पुनर्विद्याऽविद्ये ईशते नियमयति सताभ्यामन्यः साक्षित्वात्
॥१॥ कोऽसावित्याह यो योनिमिति। यो योनिं योनिं स्थानं स्थानं। यः पृथिव्यां तिष्ठन्नित्यादिनोक्तानि पृथिव्यादीनि अधि-
तिष्ठति नियमयति। एकोऽद्वितीयः परमात्मा। विश्वानि रोहितादीनि रूपाणि योनीश्च प्रभवस्थानानि अधितिष्ठति। ऋषिं
सर्वज्ञमित्यर्थः। कपिलं कनकं कपिलवर्णं प्रसूतं स्वेनैवोत्पादितं हिरण्यगर्भं जनयामास पूर्वमित्यस्यैव जन्मश्रवणात्। अ-
न्यस्य वा श्रवणात्। उत्तरत्र। यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मा इति वक्ष्यमाणत्वात्। कपिलोऽग्रज इति
पुराणवचनात् कपिलो हिरण्यगर्भो वा निर्दिश्यते। कपिलर्षिर्भगवतः सर्वभूतस्य वै किल। विष्णोरंशो जगन्मोहनाशाय

षष्ठेऽध्याये। मंत्रः १८। ॥२॥

श्वे० कृतेयुगे परं ज्ञानं कपिलादिस्वरूपधृक्। ददाति सर्वभूतात्मा सर्वस्य जगतो हितं ॥२॥ त्वं प्रोक्तः सर्वदेवानां ब्रह्मा ब्रह्मविदामसि॥
भा० वायुर्बलवतां देवो योगिनां त्वं कुमारकः ॥३॥ ऋषीणां च वसिष्ठस्त्वं व्यासो वेदविदामसि। सांख्यानां कपिलो देवो रुद्राणामसि शं
२८ करः ॥४॥ इति परमर्षिः प्रसिद्धः। ततस्तदानीं तु भुवनमस्मिन्प्रवर्तते कापिलं कवीनां। स षोडशात्मा पुरुषश्च विष्णोर्विराजमा
नं तमसः परस्तादिति। श्रूयते मुंडकोपनिषदि स एव वा कपिलः प्रसिद्धः। अग्रे सृष्टिकाले यो ज्ञानैर्धर्मज्ञानवैराग्यैश्वर्यैर्बि
र्त्तिबभार जायमानं च पश्येदपश्यदित्यर्थः ॥२॥ किंच एकैकमिति। सुरनरतिर्यगादीनां स्वजातिजालमेकैकं प्रत्येकं बहुधा ना
नाप्रकारं विकुर्वन् सृष्टिकालेऽस्मिन् मायाऽऽत्मके क्षेत्रे। संहरत्येष देवः। भूयः पुनर्यो लोकानां तथा मरीच्यादयस्तान् सृष्ट्वा

एकैकं जालं बहुधा विकुर्वन्नस्मिन्क्षेत्रे संहरत्येष देवः। भूयः सृष्ट्वा यतयस्तथेशः सर्वाधिपत्यं कुरुते महात्मा ॥३॥
सर्वा दिश ऊर्ध्वमधश्च तिर्यक्प्रकाशयन्भ्राजते यद्वनड्वान्। एवं स देवो भगवान्वरेण्यो योनिस्वभावानधितिष्ठ
त्येकः ॥४॥ यच्च स्वभावं पचति विश्वयोनिः पाच्यांश्च सर्वान्परिणामयेद्यः। सर्वमेतद्विश्वमधितिष्ठत्येको गुणांश्च सर्वान्विनियोज

तथा। यथा पूर्वस्मिन्कल्पे सृष्टवानीशः सर्वाधिपत्यं कुरुते महात्मा ॥३॥ किंच सर्वा दिश इति। सर्वा दिशः प्राच्याद्या ऊर्ध्वमुपरि
ष्टादधश्चाधस्तात् तिर्यक् पार्श्वदिशश्च प्रकाशयन् स्वात्मचैतन्यज्योतिषा प्रकाशयते भ्राजते दीप्यते ज्योतिषा यत् उ अनड्वा
वाहने ।३ न् यद्वादित्यः। यथाऽनड्वानादित्यो जगच्चक्रानुभावनेयुक्तः। एवं स देवो द्योतनस्वभावो भगवानैश्वर्यादिसमन्वितः। वरेण्यो
वरणीयः संभजनीयः। निष्कारणं कृत्स्नजगतः स्वभावान् स्वात्मभूतान् पृथ्व्यादीन् भावान्। अथवा कारणस्वभावान् पृथि
व्यादीनधितिष्ठति नियमयति। एकोऽद्वितीयः परमात्मा ॥४॥ यच्च स्वभावमिति। यच्च यश्चेति लिंगव्यत्ययः। स्वभावं यद्यग्नेरौ
ष्ण्यं पचति निष्पादयति विश्वस्य जगतो योनिः। पाच्यांश्च पाकयोग्यान् पृथिव्यादीन् परिणामयेद्यः। सर्वमेतद्विश्वमधितिष्ठ
ति नियमयत्येकः। गुणांश्च सत्त्वरजस्तमोरूपान् विनियोजयेद्यः एवंलक्षणः ॥५॥ ॥ ॥ ॥ ॥ २८

किंच तद्वेदगुह्य इति। तत्र प्रकृतात्मस्वरूपं वेदानां गुह्योपनिषदो वेदगुह्योपनिषदस्तासु वेदगुह्योपनिषत्सु। गूढं संवृतं
ब्रह्मा हिरण्यगर्भो वेदते जानाति ब्रह्मयोनिं वेदप्रमाणकमित्यर्थः। अथवा ब्रह्मणो हिरण्यगर्भस्य योनिं वेदस्य वा ये पूर्व
देवा रुद्रादयः ऋषयश्च वामदेवादयस्ते तद्विदुस्ते तन्मयास्तदात्मभूताः सन्तः अमृता अमरणधर्माणो बभूवुः तथेदानीन्तनो
ऽपि तमेव विदित्वाऽमृतो भवतीति वाक्यशेषः। एतावत्पदार्थ उपवर्णितः। ६। अथेदानीं तं पदार्थमुपवर्णयितुमुत्तरे मन्त्राः
प्रस्तूयन्ते। गुणान्वय इति। गुणैः कर्मज्ञानकृतवासनामयैरन्वयो यस्य सोऽयं गुणान्वयः। फलार्थस्य कर्मफलस्य स एवोपभो
क्ता। स विश्वरूपो नानारूपः कार्यकारणोपचितत्वात्। त्रयः सत्त्वादयो गुणा अस्येति त्रिगुणः। त्रयो देवयानादयो मार्गभेदा अ
स्येति त्रिवर्त्मा। धर्माधर्मज्ञानमार्गभेदा अस्येति वा। प्राणस्य पञ्चवृत्तेरधिपः संचरति। कैः। स्वकर्मभिः। ७। अङ्गुष्ठमात्रोऽङ्गुष्ठ स्वामिनः

तद्वेदगुह्योपनिषत्सु गूढं तद्ब्रह्मा वेदते ब्रह्मयोनिं। ये पूर्वं देवा ऋषयश्च तद्विदुस्ते तन्मया अमृता वै बभूवुः। ६। गु
णान्वयो यः फलकर्मकर्ता कृतस्य तस्यैव स चोपभोक्ता। स विश्वरूपस्त्रिगुणस्त्रिवर्त्मा प्राणाधिपः संचरति स्व
कर्मभिः। ७। अङ्गुष्ठमात्रो रवितुल्यरूपः संकल्पाहंकारसमन्वितो यः। बुद्धेर्गुणेनात्मगुणेन चैव आराग्रमात्रोऽ
परोऽपि दृष्टः। ८। वालाग्रशतभागस्य शतधा कल्पितस्य च। भागो जीवः स विज्ञेयः स चानन्त्याय कल्पते॥ ९॥

परिमितहृदयसुषिरापेक्षया रवितुल्यरूपो ज्योतिःस्वरूप इत्यर्थः। संकल्पाहंकारादिना समन्वितः। बुद्धेर्गुणेनात्मगुणे
न च जरादिना। उक्तं जरामृत्यू शरीरस्येति। आराग्रमात्रः प्रतोदाग्रप्रोतलोहकण्टकाग्रमात्रोऽपरोऽपि ज्ञानात्मा दृष्टोऽवगतः
अपि शब्दः एकः संभावनायां अपरोऽप्यौपाधिको जलसूर्य इव जीवात्मा संभावित इत्यर्थः। ८। पुनरपि दृष्टान्तान्तरेण दर्शयति
वालाग्रेति वालाग्रस्य शतकृतो भेदमापादितस्य यो भागस्तस्यापि शतधा कल्पितस्य भागो जीवः स विज्ञेयः। लिंगस्यातिसू
लिंग। ९ क्ष्मत्वात् तत्परिमाणेनाऽयं व्यपदिश्यते स च जीवस्वरूपेणानंत्याय कल्प्यते स्वतः। ९। श्रीकृष्णवासुदेवाय नमो नमः।

किंच नैव स्त्रीति। स्वतोऽद्वितीयापरोक्षब्रह्मात्मस्वभावत्वान्नैव स्त्री न पुमानेष नैव चायं नपुंसकः। यद्यत् स्त्रीशरीरं पुरुषशरीरं वाऽऽदत्ते तेन तेन स च विज्ञानात्मा रक्षते संरक्ष्यते। तत्तद्धर्मानात्मन्यध्यस्याभिमन्यते। स्थूलोऽहं कृशोऽहमहं पुमानहं स्त्र्यहं नपुंसक इति। १०। केन तर्हि सौ शरीराण्यादत्त इत्याह संकल्पनेति प्रथमं संकल्पनं ततः स्पर्शनं त्वगिंद्रियव्यापारः ततो दृष्टिर्विधानं ततो मोहः तैः संकल्पनस्पर्शनदृष्टिमोहैः शुभाशुभानि कर्माणि निष्पद्यंते ततः कर्मानुगानि कर्मानुसारीणि स्त्रीपुंनपुंसकलक्षणानि अनुक्रमेण परिपाकापेक्षया देही मर्त्यः स्थानेषु देवतिर्यङ्मनुष्यादिष्वभिसंप्रपद्यते। तत्र दृष्टांतमाह ग्रासांबुनोरन्नपानयोरनियतयोर्वृष्टिरासेचनं निदानमात्मनः शरीरस्य वृद्धिर्जायते यथा तद्वदित्यर्थः। ११। स्थूलानीति। स्थूलान्यश्मादीनि। तानि च सूक्ष्माणि तेजसधातुप्रभृतीनि। बहूनि

नैव स्त्री न पुमानेष न चैवायं नपुंसकः। यद्यच्छरीरमादत्ते तेन तेन स रक्ष्यते १० संकल्पनस्पर्शनदृष्टिमोहैर्ग्रासांबुवृष्ट्यात्मविवृद्धजन्म। कर्मानुगान्यनुक्रमेण देही स्थानेषु रूपाण्यभिसंप्रपद्यते ११ स्थूलानि सूक्ष्माणि बहूनि चैव रूपाणि देही स्वगुणैर्वृणोति क्रियागुणैरात्मगुणैश्च तेषां संयोगहेतुरपरोऽपि दृष्टः १२ अनाद्यनंतं कलिलस्य मध्ये विश्वस्य स्रष्टारमनेकरूपं विश्वस्यैकं परिवेष्टितारं ज्ञात्वा देवं मुच्यते सर्वपाशैः। १३॥

देहादिशरीराणि देही विज्ञानात्मा स्वगुणैर्विहितप्रतिषिद्धविषयानुभवसंस्कारैर्वृणोति आवृणोति। ततस्तेन क्रियागुणैरात्मगुणैश्च स देही अपरोऽपि देहांतरसंयुक्तो भवतीत्यर्थः। १२। स एवमविद्याकामकर्मफलरागादिगुरुभाराक्रांतोऽलाबुरिव सामुद्रजलनिमग्नो निश्चयेन देहाहंभावमापन्नः प्रेततिर्यङ्मनुष्यादियोनिष्वाजवंजवीभावमापन्नः कथंचित्पुण्यवशादीश्वरार्थकर्मानुष्ठानेनापगतरागादिमलोऽनित्यादिदर्शनेनोत्पन्नेहामुत्रार्थफलभोगविरागः शमदमादिसाधनसंपन्नः तमात्मानं ज्ञात्वा मुच्यत इत्याह। अनाद्यनंतमिति। अनाद्यनंतं आद्यंतरहितं कलिलस्य मध्ये गहनगंभीरसंसारस्य मध्ये विश्वस्य स्रष्टारमुत्पादयितारं। अनेकरूपं विश्वस्यैकं परिवेष्टितारं स्वात्मना संव्याप्याऽवस्थितं ज्ञात्वा देवं ज्योतीरूपं परमात्मानं

ति ४

।भावग्राह्यमनीडाख्यं भावाभावकरं शिवं। कलासर्गकरं देवं ये विदुस्ते जहुस्तनुं।१४। इति श्वेताश्वतरोपनिषत्सु पंचमोऽध्यायः।। ५।। ८।।

केन पुनरसौ गृह्यत इत्याह भावग्राह्यमिति भावेन विशुद्धांतःकरणेन गृह्यत इति भावग्राह्यं अनीडाख्यं नीडं शरीरं अशरीराख्यं भावाभावकरं। शिवं शुद्धं अविद्यातत्कार्यविनिर्मुक्तमित्यर्थः। कलानां षोडशानां प्राणादिना मांतानां स प्राणमसृजतेत्यादिनाथर्वणोक्तानां सर्गकरं देवं ये विदुरहमस्मीति ते जहुः परित्यजेयुः तनुं शरीरं।१४। इति श्रीगोविंदभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्यस्य श्रीशंकरभगवतः कृतौ श्वेताश्वतरोपनिषद्भाष्ये पंचमोऽध्यायः।५।

ॐ तत्सत् ॐ ।। नन्वन्ये कालादयः कारणमिति मन्यंते तत्कथं पुनरीश्वरस्य कलासर्गकरत्वमित्याशंक्याह स्वभावमिति। स्वभावमेके कवयो मेधाविनो वदंति। कालं तथाऽन्ये। कालस्वभावयोर्ग्रहणं प्रथमाध्याये निर्दिष्टानामन्येषामप्युपलक्षणार्थं। परिमुह्यमाना अविवेकिनो विषयात्मानं न सम्यग्जानंति। तु शब्दोऽवधारणे। देवस्यैष महिमा माहात्म्यं। येनेदं भ्रा

ॐ स्वभावमेके कवयो वदंति कालं तथान्ये परिमुह्यमानाः। देवस्यैष महिमा तु लोके येनेदं भ्राम्यते ब्रह्मचक्रं।१। येनावृतं नित्यमिदं हि सर्वं ज्ञः कालकालो गुणी सर्वविद्यः। तेनेशितं कर्म विवर्तते ह पृथिव्यप्तेजोऽनिलखानि चिंत्यं।२। तत्कर्म कृत्वा विनिवर्त्य भूयस्तत्त्वस्य तत्त्वेन समेत्य योगं। एकेन द्वाभ्यां त्रिभिरष्टभिर्वा कालेन चैवात्मगुणैश्च सूक्ष्मैः ।।३।

म्यते परिवर्तते ब्रह्मचक्रं।१। महिमानं प्रपंचयति येनेति येनेश्वरेणावृतं व्याप्तमिदं जगत् नित्यं नियमेन। ज्ञः कालकारः कालस्यापि कर्ता। गुणी अपहतपाप्मादिमान्। सर्वं वेत्तीति सर्वविद्यः। तेनेश्वरेणेशितं प्रेरितं कर्म क्रियत सजीवकर्म हशब्दः प्रसिद्धिद्योतकः। प्रसिद्धमेतदीश्वरप्रेरकं कर्म विवर्तत इति। जगदात्मना यत्पुनस्तत्कर्म पृथिव्यप्तेजोऽनिलखानि पृथिव्यादिभूतपंचकं यत्प्रथमाध्याये चिंत्यमित्युक्तं।२। एतदेव प्रपंचयति तदिति तत्कर्म पृथिव्यादिसृष्टिं विनिवर्त्य प्रत्यवेक्षणं कृत्वा भूयः पुनस्तत्त्वात्मनस्तत्त्वेन भूम्यादिना योगं समेत्य संगम्य णीलोपो द्रष्टव्यः। कतिविधैः प्रकारैः। एकेन द्वाभ्यां त्रिभिरष्टभिर्वा प्रकृतिभूतैः तत्त्वैः तदुक्तं भूमिरापोऽनिलो वायुः खं मनो बुद्धिरेव च अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा इति कालेन चैवात्मगुणैश्चांतःकरणगुणैः

श्वे० भा० ३०

इदानीं कर्मणां मुख्यविनियोगं दर्शयति आरभ्येति आरभ्य कृत्वा कर्माणि गुणैः सत्त्वादिभिरन्वितानि योजयेदीश्वरे समर्पयेद् यस्तेषामीश्वरे समर्पितत्वादात्मसंबंधाभावस्तदभावे पूर्वकृतकर्मणां नाशः। उक्तं च यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् यत्तपस्यसि कौंतेय तत्कुरुष्व मदर्पणं। शुभाशुभफलैरेवं मोक्ष्यसे कर्मबंधनैः। ब्रह्मण्याधाय कर्माणि संगं त्यक्त्वा करोति यः लिप्यते न स पापेन पद्मपत्रमिवांभसा। कायेन मनसा बुद्ध्या केवलैरिंद्रियैरपि। योगिनः कर्म कुर्वंति संगं त्यक्त्वात्मशुद्धये। इति च कर्मक्षये विशुद्धसत्त्वो याति ततोऽन्यस्तत्त्वेभ्यः प्रकृतिभूतेभ्योऽन्यो ह्यविद्यातत्कार्यविनिर्मुक्तः श्चितसदानंदाऽद्वितीयब्रह्मात्मत्वेनावगच्छतीत्यर्थः। अन्यदिति पाठे तत्त्वेभ्यो यदन्यद् ब्रह्म तद्यातीति। ४। उक्तस्यार्थस्य दृढिम्ने उत्तरे मंत्राः प्रस्तूयंते कथं नाम विषयविषां धीः कथं नाम ब्रह्मजानीयुरित्यत आह आदिरिति। आदिः कारणं सर्वस्य शरीरसंयोगनिमित्तानामविद्यानां हेतुः उक्तं च

आरभ्य कर्माणि गुणान्वितानि भावांश्च सर्वान् विनियोजयेद्यः। तेषामभावे कृतकर्मनाशः कर्मक्षये याति स तत्त्वतोऽन्यः॥४॥ आदिः स संयोगनिमित्तहेतुः परस्त्रिकालादकलोऽपि दृष्टः। तं विश्वरूपं भवभूतमीड्यं देवं स्वचित्तस्थमुपास्य पूर्वं॥५॥ स वृक्षकालाकृतिभिः परोऽन्यो यस्मात्प्रपंचः परिवर्ततेऽयं। धर्मावहं पापनुदं भगेशं ज्ञात्वाऽऽत्मस्थममृतं विश्वधाम॥६॥ ॥

एष ह्येव साधु कर्म कारयति च। परस्त्रिकालादतीतानागतवर्तमानात्। उक्तं च यस्मादर्वाक् संवत्सरोऽहोभिः परिवर्तते। तं देवाः ज्योतिषां ज्योतिः आयुर्होपासते। मृतं कस्मात्। यस्मादकालोऽसौ न विद्यते कालाः कलाः प्राणादिनामांता अस्येत्यकलः। कालवद्धि कालत्रयपरिच्छिन्नमुत्पद्यते विनश्यति च। अयं पुनरकालो निष्कलश्च। तस्मान्न कालत्रयपरिच्छिन्नमुत्पद्यते विनश्यति च। तं विश्वात्मरूपमेतस्येति विश्वरूपं। भवत्यस्मादिति भवः। भूतमवितथस्वरूपं। ईड्यं देवं स्वचित्तस्थं उपास्य यमहमस्मीति समाधानं कृत्वेत्यर्थः। ५। पूर्ववाक्यार्थज्ञानोदयात् पुनरपि तमेव दर्शयति स वृक्षेति। स वृक्षाकारेभ्यः कालाकारेभ्यः परो वृक्षकालाकृतिभिः परो वृक्षः संसारवृक्षः। उक्तं च ऊर्ध्वमूलोऽवाक्शाख एषोऽश्वत्थः सनातन इति। अन्यः प्रपंचासंस्पृष्ट इत्यर्थः। यस्मादीश्वरात्प्रपंच परिवर्तते। धर्मावहं पापनुदं। भगस्यैश्वर्यादेरीशं स्वामिनं ज्ञात्वा आत्मस्थं आत्मनि बुद्धौ स्थितं अमृतममरणं धर्माणां विश्व ३०

इदानीं विद्वदनुभवं दर्शयन्नुक्तमर्थं दृढीकरोति तमीश्वराणामिति। तमीश्वराणां वैवस्वतादीनां परमं महेश्वरं तं देवता
नामिंद्रादीनां परमं च देवतं पतिं पतीनां प्रजापतीनां परमं। परस्तात् परतोऽक्षरात् विदाम देवं द्योतनस्वभावं। भुवनानामी
शं भुवनेशं ईड्यं स्तुत्यं।७। कथं महेश्वरमित्याह नतस्येति। नतस्य कार्यं शरीरं करणं चक्षुरादि विद्यते। नतत्समश्चाभ्य
धिकश्च दृश्यते श्रूयते वा। पराऽस्य शक्तिर्विविधैव श्रूयते सा च स्वाभाविकी ज्ञानबलक्रिया च। ज्ञानक्रिया च बलक्रिया च। ज्ञा
नक्रिया सर्वविषयज्ञानप्रवृत्तिः बलक्रियास्वसन्निधिमात्रेण सर्वं वशीकृत्य नियमनं। यस्मादेवं तस्मात्।८। नतस्येति। नतस्य
कश्चित् पतिरस्ति लोके अत एव न तस्येशिता नियंता। नैव च तस्य लिंगं चिह्नं धूमस्थानीयं येनानुमीयेत तं स कारणं सर्वस्य का
रणं। करणाधिपाधिपः परमेश्वरः। यस्मादेवं तस्मात् न तस्य कश्चिज्जनिता जनयिता न चाधिपः।९। इदानीं मंत्रद्वयमभि

इदानीं कारणे
ज्ञेयं तत्स्वरूपं
यः परमेश्वरः

तमीश्वराणां परमं महेश्वरं तं देवतानां परमं च देवतं। पतिं पतीनां परमं परस्तात् विदाम देवं भुवनेशमीड्यं।७। नतस्य
कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते। परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी बलक्रिया च।८। नत
स्य कश्चित् पतिरस्ति लोके न चेशिता नैव च तस्य लिंगं। स कारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिपः

यस्तुंतुनाभ इ
ति पाठांतरे।४

।९। यस्तूर्णनाभ इव तंतुभिः प्रधानजैः स्वभावतः। देव एकः स्वमावृणोति स नो दधातु ब्रह्माप्ययं।१०। एको देवः सर्वभूतेषु
गूढः सर्वव्यापी सर्वभूतांतरात्मा। कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च।११।
प्रेतमर्थं प्रार्थयते यस्तूर्णनाभ इति। यथोर्णनाभिरात्मप्रभवैस्तंतुभिरात्मानमेव समावृणोति तथा प्रधानजैरव्यक्तप्रभवै
र्नामरूपकर्मभिः स्वस्थानीयैः स्वमात्मानमावृणोत् आवृणोति संछादितवान् सः नो मह्यं ब्रह्मण्यप्ययं ब्रह्माप्ययं एकी

भावं।२

दधातु ददातित्यर्थः।१०। पुनरपि तमेव करतलन्यस्तामलकवत् साक्षाद्दर्शयन् तद्विज्ञानादेव परमपुरुषार्थप्राप्तिर्नान्यथेति
दर्शयति मंत्रद्वयेन। एको देव इति। एकोऽद्वितीयो देवः द्योतनस्वभावः सर्वभूतेषु गूढः सर्वप्राणिषु संवृतः सर्वव्यापी सर्वभूतांत
रात्मा स्वरूपभूत इत्यर्थः। कर्माध्यक्षः सर्वप्राणिकृतविचित्रकर्माधिष्ठाता। सर्वभूताधिवासः सर्वप्राणिषु वसतीत्यर्थः सर्वे

णां भूतानां साक्षी सर्वद्रष्टा। साक्षाद्द्रष्टरि संज्ञायामिति
स्मरणाच्चेता चेतयिता केवलो निरुपाधिकः। निर्गुणः स
त्त्वादिगुणरहितः। ११।

श्वे०
भा०
३१

एकोवशीति। एकोवशी स्वतंत्रः। निष्क्रियाणां बहूनां जीवानां सर्वा हि क्रिया नात्मनि समवेताः। किंतु देहेंद्रियेषु। आत्मा तु नि
ष्क्रियो निर्गुणः सत्वादिगुणरहितः कूटस्थः सन्नानात्मधर्म्मानात्मन्यध्याभिमन्यते कर्त्ता भोक्ता सुखी दुःखी कृशः स्थूलो
मनुष्योऽमुष्यपुत्रोऽस्यनप्तेति। उक्तंच। प्रकृतेः क्रियमाणानि गुणैः कर्म्माणि सर्वशः। अहंकारविमूढात्मा कर्त्ताहमिति मन्य
ते। तत्ववित्तु महाबाहो गुणकर्म्मविभागयोः। गुणा गुणेषु वर्त्तंत इति मत्वा न सज्जते। प्रकृतेर्गुणसंमूढाः सज्जंते गुणकर्म्मस्विइ
ति। एकं बीजं बीजस्थानीयं सूक्ष्मभूतं बहुधा यः करोति तमात्मस्थं बुद्धौ स्थितं येऽनुपश्यंति साक्षाज्जानंति ते धीरा बु
द्धिमंतः तेषामात्मविदां सुखं शाश्वतं नेतरेषामनात्मविदां। १२। किंच नित्य इति। नित्यो नित्यानां जीवानां मध्ये तन्नि

एकोवशी निष्क्रियाणां बहूनामेकं बीजं बहुधा यः करोति। तमात्मस्थं येऽनुपश्यंति धीरास्तेषां सुखं शाश्वतं नेतरे
षां १२ नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान्। तत्कारणं सांख्ययोगाधिगम्यं ज्ञात्वा देवं मु
च्यते सर्वपाशैः। १३ न तत्र सूर्य्यो भाति न चंद्रतारकं नेमा विद्युतो भांति कुतोऽयमग्निः। तमेव भांतमनुभाति सर्वं तस्य भासा स

त्यत्वेन तेषामपि नित्यत्वमित्यभिप्रायः। अथवा पृथिव्यादीनां मध्ये। तथा चेतनश्चेतनानां प्रमातॄणां मध्ये। एको बहूनां जी
वानां यो विदधाति प्रयच्छति कामान् कर्म्मनिमित्तान् भोगान्। सर्वस्य सांख्ययोगाधिगम्यं ज्ञात्वा देवं ज्योतिर्मयं मुच्यते स
र्वपाशैरविद्यादिभिः। १३। कथं चेतनश्चेतनानामित्युच्यते। न तत्रेति। तत्र तस्मिन् परमात्मनि सर्वावभासकोऽपि सूर्य्यो न भाति
ब्रह्म न प्रकाशयतीत्यर्थः। न हि तस्यैव भासा सर्वात्मनो रूपजातं प्रकाशयति। न तु तस्य स्वतः प्रकाशनसामर्थ्यं। तथा न
चंद्रतारकं। नेमा विद्युतो भांति। कुतोऽयमग्निरस्मद्गोचरः। किं बहुना। यदिदं जगद्भाति। तमेव स्वतो भारूपत्वाद्। भांतं दी
प्यमानमनुभात्यनुदीप्यते। यथा लोहादिवदग्निं दहंतमनुदहति न स्वतः। तस्यैव भासा दीप्त्या सर्वमिदं सूर्य्यादि भाति।
उक्तं च येन सूर्य्यस्तपति तेजसेद्धः। न तद्भासयते सूर्य्यो न शशांको न पावक इति। ज्ञात्वा देवं मुच्यत इत्युक्तम्॥ १४॥ ॥

कस्मात्पुनस्तमेव विदित्वा मुच्यते नान्येनेत्यत्राह एक इति एकः परमात्मा हंस्यविद्यादिबंधकारणमिति हंसः। भुवनस्याऽ
स्य त्रैलोक्यस्य मध्ये नान्यः कश्चित्। कस्मात्। यस्मात् स एवाग्निः अग्निरिवाऽग्निरविद्यातत्कार्यस्य दाहकत्वात् उक्तं च व्योमा
तीतोऽग्निरीश्वर इति। सलिले देहात्मना परिणते। उक्तो चेति तु पंचम्यामाहुतावापः पुरुषवचसो भवंतीति। संनिविष्टः सम्यगा
त्मत्वेन। यथा सलिले सलिलमिव स्वच्छे। यज्ञदानादिना विमलीकृतेऽतःकरणे सन्निविष्टो वेदांतवाक्यार्थः। सम्यग्ज्ञानफल
कारकोऽविद्यातत्कार्यस्य दाहक इत्यर्थः। तस्मात्तमेव विदित्वाऽतिमृत्युमेति नान्यः पंथा विद्यतेऽयनाय परमपदप्राप्तये
१५। पुनरपि विशेषतो दर्शयति। स विश्वकृदिति। स विश्वकृद्विश्वस्य कर्ता। विश्वं वेत्तीति विश्ववित्। आत्मा चासौ योनिश्चे
त्यात्मयोनिः। सर्वस्यात्मा सर्वस्य च योनिश्चेत्यन्यं ज्योतिरित्यर्थः। कालकारः कालस्य कर्ता गुणी अपहतपाप्मादिमान् विश्व

एको हंसो भुवनस्यास्य मध्ये स एवाग्निः सलिले सन्निविष्टः। तमेव विदित्वाऽतिमृत्युमेति नान्यः पंथा विद्यतेऽयनाय १५।
स विश्वकृद्विश्वविदात्मयोनिः कालकारो गुणी सर्वविद्यः। प्रधानक्षेत्रज्ञपतिर्गुणेशः संसारमोक्षस्थितिबंधहेतुः १६
स तन्मयो ह्यमृत ईशसंस्थो ज्ञः सर्वगो भुवनस्यास्य गोप्ता। य ईशेऽस्य जगतो नित्यमेव नान्यो हेतुर्विद्यत ईशनाय १७ यो ब्रह्मा

विदित्वस्य प्रपंचः। प्रधानमव्यक्तं। क्षेत्रज्ञो विज्ञानात्मा। तयोः पतिः पालयिता। गुणानां सत्वरजस्तमसामीशः। संसारमोक्षस्थिति
बंधानां हेतुः कारणं १६। स तन्मय इति। स तन्मयो विश्वात्मा। अथवा तन्मयो ज्योतिर्मय इति। तस्य भासा सर्वमिदं विभातीत्येत
दपेक्ष्योच्यते। अमृतोऽमरणधर्मा। ईशे स्वामिनि सम्यक् स्थितिर्यस्यासावीशसंस्थः। जानातीति ज्ञः। सर्वं गच्छतीति स
र्वगः। भुवनस्यास्य गोप्ता पालयिता य ईशे ईष्टे। अस्य जगतो नित्यमेव नियमेन नान्यो हेतुः समर्थो विद्यते ईशनाय जगदी
शनाय। १७। यस्मात् स एव संसारमोक्षस्थितिबंधहेतुस्तस्मात्तमेव मुमुक्षुः सर्वात्मना शरणं प्रपद्येत गच्छेदिति प्रतिपादयि
तुमाह यो ब्रह्माणमिति। यो ब्रह्माणं हिरण्यगर्भं विदधाति सृष्टवान् पूर्वं सर्गादौ यो वै वेदांश्च प्रहिणोति तस्मै। तं ह शाब्दोऽ
वधारणे तमेव परमात्मानं ॥

श्वे० उक्तं च तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः। नानुध्यायाद् बहूञ्छब्दान् वाचो विग्लापनं हि तत्। तमेवैकं जानथ आत्मानमि
भा० व देवं ज्योतिर्मयं आत्मनि या बुद्धिस्तस्याः प्रसादकरी। प्रसन्ने हि परमेश्वरे बुद्धिरपि तद्विषया प्रमाणिष्ठपं चाकारब्रह्मात्मनाऽव
३२ तिष्ठते वर्त्तते आत्मबुद्धिप्रकाशामित्यन्येऽधीयते आत्मबुद्धिप्रकाशिनीत्यात्मबुद्धिप्रकाशां। अथवा आत्मैव बुद्धिरात्मबुद्धिः सैव प्र
काशः। सैव प्रकाशोऽस्येति आत्मबुद्धिप्रकाशं मुमुक्षुर्वै वै शब्दोऽवधारणे मुमुक्षुरेव सन् न फलांतरमिच्छन् शरणमहं प्रपद्ये। एवं ता
वत् सृष्ट्यादिना यत् तत्स्वरूपमुपदर्शितं। १८। अथेदानीं स्वस्वरूपेण दर्शयति निष्कलमिति। कला अवयवा निर्गता यस्मात्
तन्निष्कलं निरवयवमित्यर्थः। निष्क्रियं स्वमहिमप्रतिष्ठितं कूटस्थमित्यर्थः। शांतमुपसंहृतसर्वविकारं। निरवद्यं अगर्हणी
यं निरंजनं निर्लेपं अमृतस्य अमृतत्वस्य मोक्षस्य प्राप्तये सेतुरिव सेतुः संसारमहोदधेरुत्तारणोपायत्वात् तं। अमृतस्य परं से तं सेतुं
देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये।१८। निष्कलं निष्क्रियं शांतं निरवद्यं निरंजनं अमृतस्य परं सेतुं दग्धें
धनमिवानलं।१९। यदा चर्मवदाकाशं वेष्टयिष्यंति मानवाः तदा देवमविज्ञाय दुःखस्यांतो भविष्यति॥२०॥ ॥
तुं दग्धेंधनानलमिव देदीप्यमानं ऊटकटायमानं।१९। किमिति तमेव विदित्वा मुच्यते नान्येनेति तत्राह यदेति। यदा चर्म
संकोचयिष्यति तद्वदाकाशं मूर्त्तं व्यापिनं यदि वेष्टयिष्यंति संवेष्टयिष्यंति मानवास्तदा देवं ज्योतिर्मयमनुदितानस्तमितज्ञाना
त्मनाऽवस्थितमशनायाद्यसंस्पृष्टं परमात्मानमविज्ञाय दुःखस्याध्यात्मिकस्याधिभौतिकस्याधिदैविकस्यांतो विना
शो न भविष्यति। आत्मज्ञाननिमित्तत्वात् संसारस्य। यावद्यं परमात्मानमात्मत्वेन न जानाति तावत्तापत्रयाभिभूतो मकरादिभि
रिव रागादिभिरितस्ततः कृष्यमाणः प्रेततिर्यङ्मनुष्यादियोनिष्वजस्रं एवं जीवीभावमापन्नः उह्यमानः संसरति। यदा पुनरपूर्व
मनपरं नेति नेतीत्यादिलक्षणमशनायाद्यसंस्पृष्टमनुदितानस्तमितज्ञानात्मनावस्थितं पूर्णानंदं परमात्मानमात्मत्वेन सा ३२
क्षाज्जानाति तदा निरस्ताज्ञानतत्कार्यः पूर्णानंदो भवतीत्यर्थः। उक्तं च अज्ञानेनावृतं ज्ञानं तेन मुह्यंति जंतवः। ज्ञानेन तु तदज्ञा

नं येषां नाशितमात्मनः। तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परं। तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः। गच्छंत्यपुना
वृत्तिं ज्ञाननिर्धूतकल्मषाः। २०। संप्रदायपरंपराया ब्रह्मविद्याया मोक्षप्रदत्वं प्रदर्शयितुं संप्रदायविद्याधिकारिणं च दर्शयति।
तपःप्रभावादिति। तपसः कृच्छ्रचांद्रायणादिलक्षणस्य। तत्र तपःशब्दस्य रूढित्वात्। नित्यादीनां विधिवदनुष्ठितानां कर्मणा
मनसश्चेंद्रियाणां चैकाग्र्यं परमं तपः इति स्मरणात्। तस्य च सर्वस्य तपसस्तस्मिन् श्वेताश्वतरे नियमेन सत्त्वात् तत्प्रभावा
त्। तत्सामर्थ्यात् देवप्रसादाच्च कैवल्यमुद्दिश्य तदधिकारसिद्ध्यै बहुजन्मसु सम्यगाराधितपरमेश्वरस्य प्रसादाच्च ब्रह्मा प
रिच्छिन्नं महत्तत्त्वं। ह इति प्रसिद्धिद्योतनार्थः। श्वेताश्वतरो नाम ऋषिर्विद्वान् यथोक्तं ब्रह्म परंपराप्राप्तं गुरुमुखाच्छ्रुत्वा म
ननिदिध्यासनादरनैरंतर्य्यसत्कारादिभिर्ब्रह्माहमस्मीत्यपरोक्षीकृताखंडसाक्षात्कारवान् अथ स्वानुभवदार्ढ्यानं

तपःप्रभावाद्देवप्रसादाच्च ब्रह्म ह श्वेताश्वतरोऽथ विद्वान्॥ अत्याश्रमि
भ्यः परमं पवित्रं प्रोवाच सम्यगृषिसंघजुष्टं॥ ॥२१॥ ॥

तेऽत्याश्रमिभ्यः अतिपूज्याश्रमिभ्य इति स्मरणात्। अत्यंतं पूज्यतमाश्रमिभ्यः साधनचतुष्टयसंपत्तिमद्भिः संन्यासेभ्यो देहादि
ष्वपि ब्रह्मलोकादिषु चनास्थावद्भ्यः अत एव वैराग्यपुष्कलवद्भ्यः तदुक्तं वैराग्यपुष्कलं न स्यान्निष्फलं ब्रह्मदर्शनं। त
स्माद्दृढतरविरतिं बुध्यायन्न सर्वदेति। स्मृत्यंतरे च यदा मनसि वैराग्यं जायते सर्ववस्तुषु। तदैव संन्यसेद्विद्वानन्यथा पतितो
भवेत्। इति परमहंससंन्यासिनस्त एवात्याश्रमिणः। तथा च श्रूयते न्यास इति ब्रह्मा ब्रह्मा हि परः परो हि। तानि वा एतान्यव
राणि तपांसि न्यास एवात्यरेचयदिति। चतुर्विधा भिक्षवश्च बहूदककुटीचकौ। हंसः परमहंसश्च यो यः पश्चात् स उत्तमः।
इति स्मरणात्। तेभ्योऽत्याश्रमिभ्यः परमं प्रकृतं ब्रह्म। तदेव परममुत्कृष्टतमं निरस्तसमस्ताविद्यातत्कार्यं निरतिशयसुखै
करसं पवित्रं शुद्धं प्रकृतिपराकृतादिमलविनिर्मुक्तं ऋषिसंघजुष्टं वामदेवसनकादीनां संघैः समूहैः जुष्टं सेवितमात्मत्वेन

न स्वकपरिभावितं प्रियतमानंदत्वेनाश्रितं आत्मनस्तु का
माय सर्वं प्रियं भवतीति श्रुतेः। सम्यग्यत्नतयाऽपरोक्षीकृ
तं यथा भवति तथा। सम्यगिति काकाक्षिन्यायेन उ

भयत्रानुबंधः कर्तव्यः। प्रोवाच उक्तवान्। तथोक्तं शिष्य
परीक्षणपूर्वकं विद्या वक्तव्या। तद्विद्योक्तो दोषः॥२१॥

श्वे० भा० ३३ विद्याया वैदिकत्वं गुप्ततमं संप्रदायपरंपराप्राप्तमित्यादि तत्त्वं चाह वेदान्त इति । वेदान्त इति जात्येकवचनं । सकलासूपनिष
त्सु परमं परमपुरुषार्थस्वरूपं गुह्यं गोप्यं नाम विशेषतमं । पुराकल्पे प्रचोदितं पूर्वकल्पे चोदितमुपदिष्टमिति संप्रदा
यप्रदर्शनं जातमिति । एतत् प्रशान्ताय पुत्राय प्रकर्षेण शान्ते सकलरागादिमलरहितचित्ताय यस्य तस्मै तादृशपुत्राय
तादृशाय शिष्याय वा दातव्यं वक्तव्यमिति यावत् । तद्विपरीताय शिष्याय वा स्नेहादिना ब्रह्मविद्या न वक्तव्या । अन्यथा प्र
त्यवायापत्तेरिति भावः प्राक्... । अत एव ब्रह्मविद्याविदनुगुणं गुरुणा चिरकालं परीक्ष्य शिष्यगुणेन ज्ञाता ब्रह्मविद्या वक्त
व्येति भावः । तथा च श्रुतिः भूय एव तपसा ब्रह्मचर्येण श्रद्धया संवत्सरं परीक्षेत । श्रुत्यंतरे च शान्तं वर्षं प्रजापतौ मघवान्
ब्रह्मचर्यमुवास इति च । एतद्ब्रह्मविद्याप्रपंचितरूपदेशः सहस्रिकायामित्यत्र संकोचः कृतः ॥२२॥ अत्रापि देवता गुरुभक्तिम
वेदान्ते परमं गुह्यं पुराकल्पे प्रचोदितं । नाप्रशान्ताय दातव्यं नापुत्रायाशिष्याय वा पुनः ॥२२॥ यस्य देवे परा भक्तिर्य
था देवे तथा गुरौ । तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः इति श्वेताश्वतरोपनिषत्सु षष्ठोऽध्यायः ।
तामेव गुरुणा प्रकाशिता विद्याऽनुभवाय भवतीति प्रदर्शयति यस्येति यस्य मुमुक्षोरस्याधिकारिणो देवे द्युतनाद्येन दर्शि
ताऽखंडैकरसे सच्चिदानंदपरज्योतिःस्वरूपिणि परमेऽक्षरे परा उत्कृष्टा निरुपचरिता भक्तिः । एतदुपलक्षणं श्रवणं चल्पं श्रद्धा
वो भे यथा तथा ब्रह्मविद्योपदेष्टुर्गुराववितथमयं यस्य वर्तते तस्य तत्प्रशिष्य रसो जलरा... यथा साधनान्तरं नास्ति
। यया चतुर्विधत्स्य भोजनादन्यत्साधनान्तरं न । एवं गुरुकृपां विहाय ब्रह्मविद्या दुर्लभेति तस्माद्वितस्य मुख्याधिकारिणो महात्म
न उत्तमस्य एते कथिताः श्वेताश्वतरोपनिषदि श्वेताश्वतरेण महात्मना केवलनाऽनुपदिष्टाः प्रकाशन्ते स्वानुभवाय भवन्तीत्युक्तं
च । मुख्यत्वं ध्यतत्साधनादिदुर्लभप्रदर्शनार्थं महाप्रयपदेन समाप्त्यर्थमादरार्थं च ॥२३॥ इति श्रीगोविंदभगवत्पूज्यपादशि
ष्यस्य परमहंसपरिव्राजकाचार्यस्य श्रीशंकरभगवतः कृतौ श्वेताश्वतरोपनिषद्भाष्ये षष्ठोऽध्यायः ॥ ॐ तत्सत् हरिः ॐ ॥ ३३